# कर्मकाण्ड

## कक्षा ८



श्री दामोदर कोइराला र श्री रामेश्वर भट्टराई

# कर्मकाण्ड

(व्यावसायिक) कक्षा ८

लेखक
श्री दामोदर कोइराला
श्री रामेश्वर भट्टराई

प्रकाशक
जनक शिक्षा सामग्री केन्द्र लिमिटेड
सानो ठिमी, भक्तपुर

सर्वाधिकार जनक शिक्षा सामग्री केन्द्र लिमिटेडमा सुरक्षित

पाठ्यक्रम (२०३८) अनुसार प्रथम संस्करण २०३८, चैत्र
द्वितीय संस्करण २०४०
संशोधित तृतीय संस्करण २०४९ आषाढ

तपाईंले किनेको पुस्तकमा छपाइ प्रविधिसम्बन्धी कुनै त्रुटि फेला परेमा अधिकृत वितरक (साझा) अथवा स्थानीय बिक्रेताबाट उक्त पुस्तक साट्न सक्नुहुनेछ।
ज. शि. सा. के. लि.

जनक शिक्षा सामग्री केन्द्र लिमिटेड (एजुकेशन प्रेस) मा मुद्रित।



"राष्ट्रिय प्रतिभालाई फुलाउने, फलाउने
तथा जनताको मनोभावनालाई
विकासमूलक बनाउने नीति लिई लागू
गरिएको यस राष्ट्रिय शिक्षा
योजनाबाट केही वर्षभित्रै एउटा
जागरूक, परिश्रमी र उन्नतिशील
समाजको सिर्जना हुन सक्नेछ भन्ने
मैले आशा लिएको छु ।"

— श्री ५ वीरेन्द्र

# हाम्रो भनाइ

शिक्षालाई जीवन अपेक्षित गराई विद्यार्थीहरूमा राष्ट्रियता, राष्ट्रिय एकता, सार्वभौमिकता र नैतिकताजस्ता गुणहरूको विकास गराउने र सामाजिक जीवनयापनका लागि आवश्यक ज्ञान र सीप हासिल गराउने राष्ट्रिय शिक्षा पद्धति योजना २०२८ को विशुद्ध उद्देश्य अनुरूप विद्यालय स्तरका पाठ्यक्रम र पाठ्यपुस्तकहरूको विकास गर्ने प्रक्रिया चालू रहिआएको हो। यिनमा देखिएका कतिपय कमीहरू हटाउने र विषयवस्तुलाई समय सापेक्ष गराउने प्रयासमा बेला-बेलामा संशोधन पनि भई आएका छन्।

यसै क्रममा शिक्षालाई अझ प्रभावकारी र व्यावहारिक तुल्याउन २०३८ को शैक्षिक सत्रदेखि पाठ्यक्रम र पाठ्यपुस्तकहरूमा सुधार गरिएको छ। तदनुरूप व्यावसायिक विषय अन्तर्गत कक्षा ८ का लागि पाठ्यक्रम २०३८ अनुसार कर्मकाण्ड विषयको यो पाठ्यपुस्तक तयार गरिएको हो। यो पाठ्यपुस्तकका लेखक श्री दामोदर कोइराला र श्री रामेश्वर भट्टराई हुनुहुन्छ।

यस पाठ्यपुस्तकलाई सकेसम्म स्तरयुक्त बनाउने प्रयास गरिएको छ तापनि यसमा भाषागत, विषयगत र शैलीगत कतिपय त्रुटिहरू अझ हट्न नसकेका होलान्, तिनका सुधारका लागि शिक्षक, अभिभावक, विद्यार्थी लगायत सबै बुद्धिजीवी पाठकहरूको सक्रिय सहयोगको महत्त्वपूर्ण भूमिका रहने हुँदा यस पवित्र सेवा कार्यमा यहाँहरूको रचनात्मक सुझाव यो केन्द्र सदैव स्वागत गर्दछ।

श्री ५ को सरकार
शिक्षा तथा संस्कृति मन्त्रालय
पाठ्यक्रम पाठ्यपुस्तक तथा निरीक्षण विकास केन्द्र
सानो ठिमी, भक्तपुर
नेपाल

# विषयसूची


**खण्ड–१ अथ स्नानविधिः**

(क) नित्यस्नानम् (श्रावणीस्नानं वा)

(ख) अथाघमर्षणम्

पृष्ठ संख्या १ देखि १२ सम्म

**खण्ड–२ सामान्य सन्ध्याविधिः**

(क) आसनशुद्धिः (ख) भस्मधारणम् (ग) पवित्रधारणम् (घ) शिखाबन्धनम् (ङ) आचमनम् (च) प्राणायामः (छ) मार्जनम् (ज) अघमर्षणम् (झ) सूर्यार्घ्यः (ञ) सूर्योपस्थानम् (ट) गायत्री षडङ्गन्यासः (ठ) गायत्र्यावाहनम् (ड) गायत्र्युपस्थानम् (ढ) गायत्री ध्यानम् (ण) गायत्री जपः (त) जप समर्पणम् (थ) सन्ध्या विसर्जनम्

पृष्ठ सं० १३ देखि २१ सम्म

**खण्ड – २ (क) संक्षिप्तयज्ञोपवीत धारणविधिः**

पृष्ठ संख्या २२

**खण्ड – २ (ख) संक्षिप्त भोजनविधिः**

पृष्ठ संख्या २३ देखि २५ सम्म

**खण्ड – ३ पञ्चाङ्गज्ञानम्**

(क) परिचयः (ख) रुद्रीपाठे दिवसविचारः (ग) मेरुतन्त्रे शिववास फलसारिणी (घ) संवत्सराः (ङ) अयने (च) ऋतवः (छ) मासाः (ज) पक्षौ (झ) तिथयः (ञ) वासराणि (ट) नक्षत्राणि (ठ) योगाः (ड) करणानि (ट) सूर्य–चन्द्र बृहस्पतीनां तात्कालिक राशिज्ञानम्

(१) तत्र सूर्यस्य राशिज्ञानम् (२) चन्द्रस्य राशिज्ञानम् (३) बृहस्पतेराशिज्ञानम्

पृष्ठ सं० २६ देखि ३२ सम्म

**खण्ड–४ सङ्कल्पः**

(क) विशेष वाक्ययोजनापूर्वकं सङ्कल्पज्ञानम् (ख) परिचय

पृष्ठ सं० ३३ देखि ३४ सम्म

**खण्ड–५ कर्मपात्रनिर्माणम्**

(क) पवित्रनिर्माणम् (ख) कर्मपात्र निर्माणार्थमावश्यकान्युपकरणानि (ग) कर्मपात्र निर्माणम्

पृष्ठ सं० ३५ देखि ३७ सम्म

**खण्ड–६ अर्घ्यस्थापनम्**

(क) परिचय (ख) अर्घस्थापनार्थमावश्यकान्युपकरणानि (ग) अर्घस्थापनम्

पृष्ठ सं० ३८

## खण्ड–७ रङ्गवल्लीरचना

(क) रुद्राभिषेकार्था रङ्गवल्ली रचना (ख) परिचय

पृष्ठ सं० ३९

## खण्ड–८ रुद्राभिषेकः

(क) परिचय (ख) रुद्राभिषेकविधिः (ग) वरणम् (घ) पुण्याहवाचनम् (ङ) दीपपूजा (च) कलशपूजा (छ) गणेशपूजा (ज) रक्षाबन्धनपूजा (झ) प्रधानदेवतापूजा (ञ) ततोनाम-मन्त्रेण संक्षिप्तपूजा

पृष्ठ सं० ४० देखि ६२ सम्म

## खण्ड–८–(१) रुद्राभिषेकान्तर्गतः षडङ्गन्यासः

पृष्ठ सं० ६३ देखि ६४ सम्म

## खण्ड–८–(२) रुद्राभिषेक–तत्रशतरुद्रीय मन्त्रपाठक्रमः

पृष्ठ सं० ६५ देखि १०१ सम्म

## खण्ड–८–(३) शिवस्य विशेष पूजा

(क) रुद्राष्टाध्यायीमा उल्लेख भए अनुसारको विधिले

पृष्ठ सं० १०२ देखि १०६ सम्म

## खण्ड–८–(४) उत्तराङ्ग कर्म

(क) अर्घ्य निवेदनम् (ख) दक्षिणा सङ्कल्पः (ग) विसर्जनम् (घ) अभिषेकः (ङ) आशिष मन्त्रपाठः (च) प्रसादवितरणम् (छ) रुद्राभिषेकार्थमावश्यकान्युपकरणानि

पृष्ठ सं० १०७ देखि ११० सम्म

## खण्ड–९ सत्यनारायणपूजा

(क) परिचय (ख) कर्मपात्र निर्माणम् (ग) अर्घ्यस्थापनम् शङ्खार्घ्यस्थापनञ्च (घ) दीपपूजा (ङ) कलशपूजा (च) गणेशपूजा (छ) रङ्गवल्ली रचना (ज) प्रधानकलशस्थापनं पूजनञ्च (झ) स्थाल्यामष्टदलेषु पीठदेवता–दिक्पाल द्वारपालादि देवतापूजनम् पीठपूजा (ञ) दिक्पालपूजा (ट) द्वारपालपूजा (ठ) प्रधानदेवतापूजा (ड) अङ्गपूजा (ढ) पुष्पाञ्जलि (ण) विशेषार्घ्यं दद्यात् (त) शङ्खजलं निवेदयेत् (थ) पूर्णपात्र दानम् (द) दक्षिणा सङ्कल्पः (ध) विसर्जनम् (न) कायेन वाचा (प) अभिषेक (फ) प्रसादवितरणम् (ब) यजमानाय प्रसादवितरणम् (भ) सत्यनारायणस्य पूजार्थमावश्यकान्युपकरणानि (म) शिक्षक निर्देशन

पृष्ठ सं० १११ देखि १३१ सम्म

# अथ स्नानविधिः

स्नानसूत्रम्, (कात्यायनपरिशिष्टम्)

"अथातो नित्यस्नानम्, नद्यादौ मृद्गोमयकुशतिलसुमनस आहृत्य उदकान्तं गत्वा शुचौ देशे स्थाप्य प्रक्षाल्यपाणिपादं कुशोपग्रहो बद्धशिखी यज्ञोपवीत्याचम्य"–

## नित्यस्नानम् (श्रावणीस्नानं वा)

तत्र नद्यादौ मृद्गोमयकुशतिलसुमनस अपामार्ग दूर्वाभस्मचादाय नद्यादौ तडागे वा गत्वा शुचौ देशे संस्थाप्य हस्तौ पादौ प्रक्षाल्य बद्धशिखी यज्ञोपवीत्याचम्य प्रवाहाभिमुखः प्राङ्मुखो वा कुशोपग्रहः सङ्कल्पं कुर्यात्–

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ अद्येत्यादि देशकालौ सङ्कीर्त्य (अमुक) गोत्रोत्पन्नः (अमुक) प्रवरः (अमुक) वेदान्तर्गत (अमुक) शाखाध्यायी शर्माहं स्वात्मनः श्रुतिस्मृतिपुराणागमोक्तफलावाप्तये इह जन्मनि जन्मान्तरे वा कायिकवाचिकमानसिकसांसर्गिकज्ञाताज्ञातस्पर्शास्पर्शासन भोजनशयनगमनानृतभाषणादिजनितदुरितनिरसनपूर्वकमधीतानामध्येष्यमाणानां चाध्याप्यानां स्थापनविच्छेदक्रोशघोषणद्वन्तविवृतिदुर्वृत्तद्रुतोच्चारितवर्णानां पूर्वसवर्णानां ञ्नालोपलम्बितविवृत्तोच्चारितवर्णानां श्लिष्टास्पष्टवर्णविघट्टनादिभिः पाठितानां श्रुतीनां यद्यातयामत्वं तत्परिहारार्थम्, अष्टात्रिंशदनध्यायाध्ययने रथ्यासञ्चरतः शूद्रस्य शृण्वतोऽध्ययने म्लेच्छान्त्यजातेः शृण्वतोऽध्ययनेऽशुचिदेशेऽध्ययनेऽऽत्मनोऽशुचित्वेऽध्ययनेऽक्षरस्वरानुस्वारपदच्छेद कण्डिकाव्यञ्जनह्रस्वदीर्घप्लुतकण्ठतालुमूर्धन्योष्ठ्यदन्त्यनासिकानुनासिकरेफजिह्वामूलीयोपध्मानीयोदात्तानुदात्तस्वरितादीनां च व्यत्ययेनोच्चारणमाधुर्याक्षरव्यक्तिहीनत्वाद्यनेकप्रत्यवायपरिहारपूर्वकं सर्वस्य वेदस्य सवीर्यत्वसम्पादनद्वारा यथावत्फलप्राप्त्यर्थं श्री परमेश्वरप्रीत्यर्थं च (अमुक) तीर्थे स्नानमहं करिष्ये ।

इति सङ्कल्प्य तीर्थं प्रार्थयेत्–

ॐ नमामि गङ्गे तव पादपङ्कजं सुरासुरैर्वन्दितदिव्यरूपम् ।
भुक्तिं च मुक्तिं च ददासि नित्यं भावानुसारेण सदा नराणाम् ॥

पापिनामुद्धृतिकृते समुद्भूतासि भूतले ।
दह मे सर्वपापानि मां पुनीहि सुरेश्वरि ।।
त्वमेव गतिरस्माकं पततां नरकार्णवे ।
समुद्धर महादेवजटाजूटनिवासिनि ।।
या गतिर्योगयुक्तानामुनीनामूर्ध्वरेतसाम् ।
सा गतिः सर्वजन्तूनां गौतमीतीरवासिनाम् ।।
पुष्करादीनि तीर्थानि गङ्गाद्याः सरितस्तथा ।
आगच्छन्तु पवित्राणि स्नानकाले सदा मम ।।
त्वं राजा सर्वतीर्थानां त्वमेव जगतः पिता ।
याचितं देहि तीर्थं मे तीर्थराज नमोऽस्तु ते ।।
अपामधिपतिस्त्वं च तीर्थेषु वसतिस्तव ।
वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छ मे ।।
अधिष्ठात्र्यश्च तीर्थानां तीर्थेषु विचरन्ति याः ।
देवतास्ताः प्रयच्छन्तु स्नानाज्ञां मम सर्वथा ।।
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ।।
चन्द्र भागे महाभागे शरणागतवत्सले ।
गण्डकी सरयूयुक्ता समासाद्य पुनीहि माम् ।।
सर्वाणि यानि तीर्थानि पापमोचनहेतवः ।
आयान्तु स्नानकालेऽस्मिन् क्षणं कुर्वन्तु सन्निधिम् ।।

इति संप्रार्थ्य, "उरुꣳ हीति तोयमामन्त्र्य तत उरुꣳ हीति न्युब्जाञ्जलिहस्तेन तोयमभिमन्त्रयेत्–

**उरुꣳ हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवाऽउ ।**
**अपदे पादाप्रतिधातवेकरुतापवक्ता हृदयाविधश्चित्नमोवरुणा-**

याभिष्ठितो वरुणस्य पाशः ॥

"आवर्तं येद्येते शतमिति"

ततो ये ते शतमिति जलमावर्तयेत्–

ॐ ये ते शतं वरुणं ये सहस्रं यज्ञियाः पाश वितता महान्तः। तेभिर्नोऽअद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः।

ततः "सुमित्रिया न इत्यापोऽञ्जलिनाऽऽदाय"

ॐ सुमित्रिया नऽआपऽओषधयः सन्तु । इति

"दुर्मित्रिया इति द्वेष्यं प्रति निषिञ्चेत्"-- (कामादीन् शत्रूनुद्दिश्य तीर्थतटे स्ववामभागे निषिञ्चेत्)

ॐ दुर्मित्रियास्तस्मै सन्तु योस्मान्द्वेष्टि यञ्चवयं द्विष्मः। इति

"कटिं वस्त्यूरू जङ्घे चरणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्याचम्य नमस्योदकमालभेदङ्गानि मृदेदं विष्णुरिति"–

मृल्लेपनप्रकारो यथा– मृत्स्नामादाय तस्या भागत्रयं कृत्वा प्रथमभागं वामहस्तेनादाय नाभेरधः कटिप्रदेशमनुलिप्य हस्तं प्रक्षाल्य द्वितीयभागमादाय वामहस्तेन प्राग्वस्तिमूरू जङ्घे चरणौ करौ च त्रिस्त्रिरनुलिप्य हस्तं प्रक्षाल्याचम्य तीर्थोदकं साञ्जलिशिरसा प्रणमेत्। पुनस्तथैव तृतीयभागं वामहस्ते निधाय दक्षिणहस्तेन नाभेरुपरि ललाटमारभ्य नाभिपर्यन्तं लेपयेत्। सर्वत्र लेपने 'इदं विष्णुरिति' मन्त्रावृत्तिः।

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्यपाꣳसुरे स्वाहा ॥

ॐ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ॥
उद्धृतासि वराहेण कृष्णेन शतबाहुना।
नमस्ते सर्वभूतानां प्रभवारणि सुव्रते ॥

मृत्तिके ब्रह्मभूतासि कश्यपेनाभिवन्दिता ।
त्वया हतेषु पापेषु गच्छेयं परमांगतिम् ॥

तत्पश्चात् नाभिपरिमाणं तीर्थजलान्तः प्रविश्य–

"सूर्याभिमुखो निमज्जेदापोऽअस्मानिति"

**ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्वꣳ हि रिप्रम्प्रवहन्ति देवीः ॥**

"स्नात्वोदिदाभ्य इत्युन्मज्ज्य"–

ॐ उदिदाभ्यः शुचिरापूतऽ एमि । इत्युन्मज्ज्य पुनस्तूष्णीं त्रिवारं "निमज्ज्योन्मज्ज्याचम्य गोमयेन विलिम्पेन्मानस्तोक इति"

तत्प्रकारो यथा– पाणिभ्यां गोमयमादाय सूर्यं दर्शयित्वा भागत्रयं कृत्वा प्रथमभागं वामहस्तेनादाय नाभेरधस्ताल्लेपयेत् । पुनर्हस्तौ प्रक्षाल्य द्वितीयभागं पूर्ववद्वामहस्तेन ऊरू वस्ति जङ्घे पादौ करौ च लेपयेत् । पुनर्हस्तौ प्रक्षाल्य दक्षिणेन पाणिना तृतीयं भागमादाय नाभेरूर्ध्वं ललाटमारभ्य नाभिपर्यन्तं लेपयेत्–

**ॐ मा नस्तोके तनये मा न ऽ आयुषि मा नो गोषु मा नो ऽ अश्वेषु रीरिषः । मा नो वीरान्रुद्रभामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ।**

ॐ अग्रमग्रं चरन्तीनामोषधीनां वने वने ।
तासामृषभपत्नीनां पवित्रं कायशोधनम् ॥
यन्मे रोगं च शोकं च तन्मे दहतु गोमयम् । इति ।

पुनः पूर्ववदापो ऽ अस्मानिति प्रागुक्तौ मन्त्रौ पठन् त्रिवारं निमज्ज्य स्नायात् । ततः सजलं भस्माऽऽदाय दक्षिणेन पाणिना ललाटादिनाभ्यन्तं शरीरं लेपयन्– 'ॐ जलमिति भस्म' इति द्वौ मन्त्रौ पठेत्– ॐ जलमिति भस्म, स्थलमिति भस्म, व्योमेति भस्म । सर्वꣳ ह वा इदं भस्म । मन एतानि चक्षूꣳषि भस्मानि ॥

ॐ प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने ।
स ꣳ सृज्य मातृभिष्ट्वञ्ज्योतिष्मान्पुनरासदः ॥ इति ।

"ततोऽभिषिञ्चेदिमं मे वरुणेति चतसृभिर्मापि उदुत्तमं मुञ्चन्त्ववभृथेति । अन्ते चैतत्" यथा कुशोन्नीतेन प्रतिमन्त्रं नाभेरूर्ध्वं दक्षिणपार्श्वमारभ्य शिरो नीत्वा नाभेर्वामपार्श्वान्तं सिञ्चेत्–

मन्त्राश्च–

ॐ इमम्मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥

ॐ तत्त्वा यामि ब्रम्हणा वन्दमानस्तदाशास्ते यजमानो-हविर्भिः । अहेडमानो वरुणेह बोध्युरुश ꣳ स मा न ऽ आयुः प्रमोषीः ॥

ॐ त्वन्नो ऽ अग्ने वरुणस्य विद्वान्देवस्य हेडो ऽ अवया-सिसीष्ठाः । यजिष्ठो वन्हितमः शोशुचानो विश्वा द्वेषा ꣳ सि प्रमुमुग्ध्यस्मत् ॥

ॐ स त्वन्नो ऽ अग्नेवमो भवोती नेदिष्ठो ऽ अस्या ऽ उषसो व्युष्टौ । अवयक्ष्व नो वरुण ꣳ रराणो वीहि मृडीक ꣳ सुहवो न ऽ एधि ॥

ॐ मापो मौषधीर्हि ꣳ सीर्धाम्नो धाम्नो राजंस्ततो वरुण नो मुञ्च । यदाहुरघ्न्या ऽ इति वरुणेति शपामहे ततो वरुण नो मुञ्च ॥

ॐ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमꣳ श्रथाय । अथावयमादित्यव्रते तवानागसो ऽ अदितये स्याम ॥

ॐ मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत । अथो यमस्य पड्नीशात्सर्वस्माद्देव किल्विषात् ।

ॐ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः । अव देवैर्देवकृतमेनोयासिषमव मर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि ॥

इत्यभिषिच्य– "निमज्ज्योन्मज्ज्याचम्य दर्भैः पावयेत् । आपो हिष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीराप इति द्वाभ्यामपो देवा द्रुपदादिव शन्नोदेवीरपाꣳ रसमपोदेवीः पुनन्तु मेति नवभिः कुशोन्नीतेन जलेनात्मानमभिषिञ्चेत्

त्रिभिर्दर्भैर्दक्षिणकरधृतैः सोदकैर्नाभिमारभ्य प्रदक्षिणं नाभिपर्यन्तं वक्ष्यमाणै प्रणवादिभिर्गायत्री पूर्वैरापो हि ष्ठेत्यादि मन्त्रैरात्मानं पावयेत् ।

आदौ गायत्र्याभिषिच्य,

ॐ आपो हि ष्ठा मयोभुवस्तानऽऊर्जे दधातन । महे रणाय चक्षसे ॥

ॐ यो वः शिवतमो रसस्तस्य भाजयते ह नः । उशतीरिव मातरः ॥

ॐ तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥

ॐ इदमापः प्रवहतावद्यञ्च मलञ्च यत् । यच्चाभिदुद्रोहानृतं यच्च शेपेऽअभीरुणम् ॥ आपोमा तस्मादेनसः

पवमानञ्च मुञ्चतु ॥

ॐ हविष्मतीरिमाऽआपोहविष्माँ २ आविवासति । हविष्मान्देवोऽअध्वरो हविष्माँऽअस्तु सूर्यः ॥

ॐ देवीरापोऽअपान्नपाद्यो वऽऊर्मिर्हविष्यऽइन्द्रियावान्मदिन्तमः । तन्देवेभ्यो देवत्रा दत्त शुक्रमेभ्यो येषां भागस्थ स्वाहा ॥

ॐ कार्षिरसि समुद्रस्य त्वाक्षित्याऽउन्नयामि । समापोऽअद्भिरग्मत समोषधीभिरोषधीः ॥

ॐ अपो देवा मधुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाः । याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः ॥

ॐ द्रुपदादिव मुमुचानः स्विन्न स्नातो मलादिव । पूतं पवित्रेणे वाज्यमापः शुन्धन्तु मैनसः ।

ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥

ॐ अपाꣳरसमुद्वयस ꣳ सूर्ये सन्तꣳ समाहितम् । अपाꣳरसस्य यो रसस्तम्वो गृण्हाम्युत्तममुपयामगृहीतोसीन्द्राय त्वा जुष्टङ्गृण्हाम्येषते योनिरिन्द्राय त्वा जुष्टतमम् ॥

ॐ अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः । तसामास्थानादुज्जिहतामोषधयः सुपिप्पला ॥

ॐ पुनन्तु मा पितरः सोभ्यासः पुनन्तु मा पितामहा पुनन्तु प्रपितामहाः । पवित्रेण शतायुषा ॥

ॐ पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥

ॐ अग्नऽ आयूꣳषि पवसऽआसुवोर्जमिषञ्च नः । आरे बाधस्व दुच्छुनाम् ॥

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥

ॐ पवित्रेण पुनीहि मा शुक्रेण देवदीद्यत् । अग्ने क्रत्वा क्रतूꣳ२ रनु ॥

ॐ यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा । ब्रम्ह तेन पुनातु मा ॥

ॐ पवमानासोऽअद्य नः पवित्रेण विचर्षणी । यः पोता स पुनातु मा ॥

ॐ उभाभ्यां देवसवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ।

ॐ वैश्वदेवी पुनती देव्यागद्यस्यामिमा बह्व्यस्तन्न्वो वीतपृष्ठाः ॥ तया मदन्तः सधमादेषु वयꣳ स्याम पतयो रयीणाम् ॥

पश्चात्तूष्णीमाचम्य–

"चित्पतिर्मेत्योङ्कारेण व्याहृतिभिर्गायत्र्या चादावन्ते च । इमं मे इत्यष्टौ"–

---

१– किञ्च ॐ कारेण प्रणवेन व्याहृतिभिस्तिसृभिः गायत्र्या च 'तत्सवितुः' इत्यतपर्चा पावयेत् । कुत्र ? आदौ (आपो हि ष्ठाः) इत्यादेः पावनस्य । तथान्ते च 'चित्पतिर्मा पुनातु' इत्यस्यावसाने – इति हरिहरभाष्यम् ।

ॐ चित्पतिर्मा पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनैतच्छकेयम् ॥

ॐ वाक्पतिर्मा पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुनैतच्छकेयम् ॥

ॐ देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामःपुनेतच्छकेयम्॥ ॐ पुनातु।

ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्दुराचके॥ ॐ भूः पुनातु।

ॐ तत्त्वा यामि ब्रम्हणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोध्युरुश ꣳ समा नऽआयुः प्रमोषीः॥ ॐ भुवः पुनातु।

ॐ त्वन्नोऽअग्ने वरुणस्य विद्वान् देवस्य हेडोऽअवयासिसीष्ठाः। यजिष्ठो वन्हितमः शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ ॐ स्वः पुनातु।

ॐ स त्वन्नोऽअग्ने भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ। अव यक्ष्वनो वरुण ꣳ रराणो वीहि मृडीक ꣳ सुहवो नऽएधि। ॐ महः पुनातु।

ॐ मापो मौषधीर्हिꣳ सीर्धाम्नो धाम्नो राजँस्ततो वरुण नो

मुञ्च । यदाहुरघ्न्याऽइति वरुणेति शपामहे ततो वरुण नो मुञ्च ॥ ॐ जनः पुनातु ।

ॐ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यम ँ श्रथाय । अथावयमादित्य व्रते तवानागसोऽअदितये स्याम ॥ ॐ सत्यं पुनातु ।

ॐ अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणः । अवदेवैर्देवकृतमेनोयासिषमव मर्त्यैर्मर्त्यकृतम्पुरुराव्णो देव रिषस्पाहि ॥ ॐ ऊर्ध्वं पुनातु ।

ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियोयो नः प्रचोदयात् ॥ ॐ सर्वं पूनातु ।

ततः कुशान् जले निक्षिप्य स्नायात् । पुनरपामार्गमादाय दक्षिणपाणिना वक्ष्यमाणमन्त्रं पठन् नाभेरूर्ध्वं नाभेर्दक्षिणपार्श्वमारभ्य शिरसि नीत्वा वामपार्श्वान्तं मार्जयेत्–

ॐ अपाघमप किल्बिषमप कृत्यामपो रपः । अपामार्गत्वमस्मदपदः ष्वप्न्य ँ सुव ॥

तत्परं स्नायात् ।

अथ दूर्वाङ्कुरेण नाभेरूर्ध्वं वक्ष्यमाणमन्त्रेणात्मानं सिञ्चेत्–

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥

ततो दूर्वाङ्कुरानपि विमुच्य स्नायात्

## अथाघमर्षणम्

"अन्तर्जलेऽघमर्षणं त्रिरावर्तयेद्द्रुपदादिवायङ्गौरिति वा तृचं प्राणायामं वा सशिरस्तोमिति वा विष्णो वा स्मरणम्"

ॐ ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत । ततो रात्रिरजायत ततः समुद्रोऽअर्णवः ॥ समुद्रादर्णवादधि संवत्सरोऽअजायत । अहोरात्राणि विदधाद्विश्वस्य मिषतो वशी ॥ सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्षमथो स्वः । इति त्रिः ।

ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः । पितरञ्च प्रयन्त्स्वः ॥ इति त्रिवारं वा ।

ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव ।

पूतम्पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥ इति त्रिवारं वा ।

ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐसत्यम् ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥ ॐ आपो ज्योति रसोऽमृतम् । ब्रम्ह भूर्भुवः स्वरोम् ॥ इति वा त्रिवारम् ।

ॐ शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानिगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

इति वा त्रिवारं विष्णुं मेघवर्णं शेषशायिनं लक्ष्म्या सेव्यमानं स्मरन् पठेत् ।
एवं स्नानं कृत्वा स्नानाङ्गतर्पणं कुर्यात्–

तत्रादौ ऋजुकुशोपग्रहं सचन्दनाक्षततुलसीपत्रं जलमर्घ्यपात्रेण अञ्जलिना देवतीर्थेनैकैकवारं देवान् तर्पयेत्–

ॐ ब्रह्मादयो देवास्तृप्यन्ताम् । ॐ भूर्देवास्तृप्यन्ताम् । ॐ भुवर्देवा-स्तृप्यन्ताम् । ॐ स्वर्देवास्तृप्यन्ताम् । ॐ भूर्भुवः स्वर्देवास्तृप्यन्ताम् ।

अथ निवीती (कण्ठलम्बी) सन् कुशानुदगग्रान् कृत्वाऽऽचम्य चोदङ्मुखो भूत्वा कायतीर्थेन प्रतिमन्त्रं सयवजलेन द्विर्द्विर्ऋषींस्तर्पयेत्–

ॐ सनकादिद्वैपायनान्ता ऋषयस्तृप्यन्ताम् । ॐ भूर्ऋषयस्तृप्यन्ताम् । ॐ भुवर्ऋषयस्तृप्यन्ताम् । ॐ स्वर्ऋषयस्तृप्यन्ताम् । ॐ भूर्भुवःस्वर्ऋषयस्तृ-प्यन्ताम् ।

ततः पितृतीर्थेन प्रतिमन्त्रं त्रिस्त्रिवारं दक्षिणामुखः प्राचीनावीति भूत्वा दक्षिणाग्रमूलान् कुशान् कृत्वा सतिलजलेन पितॄन् तर्पयेत्-

ॐ कव्यवाडनलादयः पितरस्तृप्यन्ताम् । ॐ भूः पितरस्तृप्यन्ताम् । ॐ भुवः पितरस्तृप्यन्ताम् । ॐ स्वः पितरस्तृप्यन्ताम् । ॐ भूर्भुवः स्वः पितरस्तृप्यन्ताम् ।

ततः सव्यः सन् आचामेत् ।

अथ सतिलजलाञ्जलिमादाय

ॐ यन्मया दूषितं तोयं शरीरमलसम्भवैः ।
तस्य पापस्य शुद्ध्यर्थं यक्ष्मैतत्ते तिलोदकम् ।।

इति तीर्थतटे उत्सृजेत् ।

ततः

ॐ लतागुल्मेषु वृक्षेषु पितरो ये व्यवस्थिताः ।
ते सर्वे तृप्तिमायान्तु मयोत्सृष्टैः शिखोदकैः ।।

इति वृक्षादौ दक्षिणभागे शिखां निष्पीडयेत् ।

अथ शुद्धे वाससी परिधाय तिलकं कृत्वा परमात्मानं स्मरन् गृहमागच्छेत् ।

।। इति स्नानविधिः ।।

खण्ड २

# सामान्य सन्ध्याविधि:

विधिपूर्वक बिहानबेलुका सन्ध्याको समयमा सूर्यमण्डलमा ब्रह्मस्वरूपिणी गायत्रीको ध्यान गरेर गायत्री मन्त्र जप्ने विधिलाई सन्ध्याविधि भन्दछन् । उपनयन संस्कार भएका द्विजाति (ब्राह्मण, क्षत्रिय, वैश्य) ले अनिवार्य रूपमा बिहानबेलुका सन्ध्योपासन गर्नुपर्छ । द्विजातिमा पनि ब्राह्मणको त बल, पुरुषार्थ, धनसम्पत्ति, ब्राह्मणत्व जे भने पनि गायत्री हो । ब्राह्मण भएर गायत्रीको महिमा जान्दैन र बिहानबेलुका सन्ध्योपासन गर्दैन भने त्यो ब्राह्मण ब्राह्मण होइन । सन्ध्योपासन नगर्ने ब्राह्मणले पूजापाठ, दान, यज्ञ जे गरे पनि त्यसको फल पाउँदैन । त्यसले मरेपछि पनि कुकुर भएर जन्मनुपर्छ । गायत्रीमा श्रद्धा राखेर सन्ध्योपासन गर्ने ब्राह्मण महापापी नै भए पनि पापबाट मुक्त हुन्छ । फेरि पाप कर्ममा प्रवृत्त हुँदैन ।

त्रिकाल सन्ध्या गर्ने विधान छ– प्रात:, मध्याह्न र सायम् । प्रात:सन्ध्या बिहानको तारा नअस्ताउँदै र सायंसन्ध्या सूर्यास्त नहुँदै गरेको सन्ध्यालाई उत्तम सन्ध्या भन्दछन् । त्यस्तै उत्तम सन्ध्या १००८, मध्यम सन्ध्या १०८ र सामान्य सन्ध्या १० पटक जप गर्नुलाई भनिन्छ । १० पटक पनि गायत्री जप्तैन भने त्यो महापापी हुन्छ ।

बिहान स्नान नगरी खाए आफ्नै मल खाए सरह, गायत्री जप नगरी खाए पीपरगत खाए सरह र सूर्यलाई अर्घ्य नदिई खाए सूर्यहत्याको पाप लाग्छ ।

सूर्यार्घ्य र सूर्योपस्थान पनि सन्ध्योपासनको एक प्रमुख अङ्ग हो । यसकारण सन्ध्योपासन गर्दा सूर्यार्घ्य र सूर्योपस्थान पनि हुनैपर्छ ।

## (क) आसनशुद्धि:

मन्त्र पढेर आसनलाई पवित्र तुल्याउने कर्मलाई आसनशुद्धि भन्दछन् । जुनसुकै शुभ–कर्म गर्दा पनि पवित्र आसनमा बसेर गर्नुपर्दछ । अपवित्र आसनमा बसेर गरेको कर्म सफल हुँदैन । बाह्य दृष्टिबाट जतिसुकै पवित्र देखिए पनि अन्तर्दृष्टिबाट त्यसलाई मन्त्रद्वारा पवित्र पारिएको हुनुपर्दछ । मन्त्रद्वारा आसनशुद्धि गर्ने विधि यस प्रकार छ–

**ॐपृथ्वीति मन्त्रस्य मेरुपृष्ठऋषि: सुतलं छन्द: कूर्मो देवता आसने विनियोग: ।**

**ॐ पृथ्वी त्वया धृता लोका देवि त्वं विष्णुना धृता ।**

**त्वं च धारय मां नित्यं पवित्रं कुरु चासनम् ॥**

## (ख) भस्मधारणम्

यज्ञ आदिको भस्म (खरानी) लिएर मन्त्रपूर्वक निधार, घाँटी, कुम, हृदयमा लगाउनुलाई भस्मधारण भन्दछन् । सध्योपासन र पूजा आदि कर्म गर्दा भस्मधारण गरेर मात्र गर्नुपर्छ । भस्मधारण गर्नाले मनुष्य शिवस्वरूप बन्दछ । भस्मधारण नगरी गरेको कर्मको फल छैन। धारण गर्ने विधि–

दक्षिणहस्तेन भस्म गृहीत्वा वामहस्ते निधाय उदकं संमृश्य दक्षिणहस्तेन मर्दयेत् ।

ॐ अग्निरिति भस्म, वायुरिति भस्म, जलमिति भस्म, स्थलमिति भस्म, व्योमेति भस्म, सर्व ꣳ ह वा इदं भस्म मन एतानि चक्षूंषि भस्मानि ॥

इति सम्मर्द्य अभिमन्त्रणम्–

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

ॐ प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने । स ꣳ सृज्य मातृभिष्ट्वञ्ज्योतिष्मान्पुनरासदः ।

धारणम्–

ॐ त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम् ॥
यद्देवेषु त्र्यायुषं तन्नोऽअस्तु त्र्यायुषम् ॥

## (ग) पवित्रधारणम्

सन्ध्या, पूजा, होम आदि गर्दा पवित्र धारण गरेकै हुनुपर्छ । पवित्र धारण नगरी गरेको कर्म सफल हुँदैन । पवित्रको लक्षण–

"अनन्तर्गर्भितं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥"

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः। प्रसवऽउत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥

## (घ) शिखाबन्धनम्

टुपी शिखा पार्नुलाई शिखाबन्धन भन्दछन्। शिखाबन्धन नगरी गरेको कुनै कर्मको पनि फल मिल्दैन । त्यसकारण शिखाबन्धन गरेर मात्र सन्ध्योपासन गर्नुपर्छ ।

गायत्र्या शिखां बध्वा–

ॐ चिद्रूपिणि महामाये दिव्यतेजः समन्विते ।
तिष्ठ देवि शिखाबन्धे तेजोवृद्धि कुरुष्व मे ॥

ॐ मानस्तोके तनयेमानऽआयुषिमानो गोषुमानोऽअश्वेषु रीरिषः। मानो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥

## (ङ) आचमनम्

हातमा जल लिएर ब्रह्मतीर्थ (बूढी औंलाको मूल) बाट तीनपल्ट पानी अचाउनुलाई आचमन भन्दछन् । आभ्यन्तर पवित्रताका लागि आचमन बताइएको छ। आचमनविना कर्ममा योग्यता पनि प्राप्त हुँदैन। त्यसकारण सन्ध्योपासन आदि जुनसुकै कर्ममा पनि आचमन गर्नु आवश्यक छ ।

ॐ ऋग्वेदाय स्वाहा। ॐ यजुर्वेदाय स्वाहा। ॐ सामवेदाय स्वाहा। (इति वारत्रयमाचम्य) ॐ अथर्ववेदाय नमः। (इति हस्तप्रक्षालनम्)

## (च) प्राणायामः

प्राणायामका तीन भेद छन्– पूरक, कुम्भक र रेचक। दायाँ नाक बन्द गरेर बायाँ नाकबाट बिस्तारै स्वास खिच्नुलाई पूरक, दुवै नाक बन्द गरेर स्वास रोक्नु कुम्भक र दायाँ नाक

खोलेर स्वास छोड्नुलाईं रेचक प्राणायाम भन्दछन् । यसको फेरि उल्टो र सुल्टो गरी तीन पल्ट गरेपछि एक प्राणायाम पूरा हुन्छ ।

प्राणायामबाट वायुशुद्धि र रक्तशुद्धि भएर मनुष्य निरोगी बन्दछ । साथै अन्तरात्मासमेत शुद्ध हुन्छ ।

ॐ प्रणवस्य ब्रह्माऋषिः अग्निर्देवता दैवीगायत्रीछन्दः सप्तानां व्याहृतीनां क्रमेण विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा--ऋषयः अग्निवायु सूर्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवताः गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तिस्त्रिष्टुब्ज-गत्यश्छन्दांसि, तत्सवितुरित्यस्य विश्वामित्रऋषिः सवितादेवता गायत्रीछन्दः आपोज्योतिरित्यस्य प्रजापतिऋषिः ब्रह्माग्निवायुसूर्यादेवता यजुश्छन्दः सर्वेषां प्राणायामे विनियोगः ।।

**ॐ भूः । ॐ भुवः । ॐ स्वः । ॐ महः । ॐ जनः । ॐ तपः । ॐ सत्यम् । ॐ तत्सवितुर्वरेण्यम्० । ॐ आपोज्योतीरसोमृतं ब्रम्ह भूर्भुवः स्वरोम् ।।**

## (छ) मार्जनम्

बाँया हातमा जललिएर दाहिने हातले कुशपवित्रद्वारा सेचन गर्नुलाई मार्जन भनिन्छ । मार्जन पवित्रताका निमित्त गरिन्छ ।

ॐ आपो हि ष्ठेति तिसृणां सिन्धुद्वीपऋषिः आपो देवता गायत्री छन्दः मार्जने विनियोगः ।

**ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन । महे रणाय चक्षसे ।। ॐ योवः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ।। ॐ तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ।।**

## (ज) अघमर्षणम्

शारीरिक पाप पखाल्नु (मिल्काउनु) लाई अघमर्षण भनिन्छ। अघमर्षण गर्दा अञ्जलिमा जल लिएर नाकले छुनुपर्छ र मन्त्रोच्चारणपूर्वक आफ्नो शरीरमा रहेको पाप भित्रबाट बाहिर निस्केको सम्झनुपर्छ, अनि त्यो पापमिश्रित जल बाँयातिर मिल्काउनुपर्छ।

ॐ द्रुपदादिवेत्यस्य कोकिलराजपुत्रऋषिः। आपोदेवता अनुष्टुप्छन्दः। अघमर्षणे विनियोगः।

**ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव। पूतस्पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः॥**

## (झ) सूर्यार्घ्यः

ॐ भूर्भुवः स्वरिति महाव्याहृतीनां परमेष्ठी प्रजापतिर्ऋषिः अग्निवायुसूर्यादेवताः गायत्र्युष्णिगनुष्टुभश्छन्दांसि, तत्सवितुरित्यस्य विश्वामित्रऋषिः सवितादेवता गायत्रीछन्दः अर्घ्यदाने विनियोगः। ॐ भूर्भुवः स्वः ॐ तत्सवितु०। इदमर्घ्यं समर्पयामि भगवतेब्रह्मस्वरूपिणे सूर्यनारायणाय नमः।

## (ञ) सूर्योपस्थानम्

ॐ उद्वयमुदुत्यमिति द्वयोः प्रस्कण्वऋषिः सूर्योदेवता अनुष्टुप्छन्दः, चित्रंदेवानामित्यस्य कुत्साङ्गिरसऋषिः सूर्योदेवता त्रिष्टुप्छन्दः, तच्चक्षुरित्यस्य दध्यङङ्गाथर्वणऋषिः सूर्योदेवता उष्णिक्छन्दः सूर्योपस्थाने विनियोगः।

**ॐ उद्वयन्तमसस्परि स्वः पश्यन्तऽउत्तरम्। देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्॥ उदुत्यञ्जातवेदसन्देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्॥ चित्रन्देवानामुदगादनी कञ्चक्षुर्मित्रस्य-वरुणस्याग्नेः। आप्प्राद्यावापृथिवीऽअन्तरिक्ष ६ सूर्य आत्मा**

जगतस्तस्थुषश्च ॥ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतञ्जीवेम शरदः शत ँ शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ॥

## (ट) गायत्रीषडङ्गन्यासः

### तत्रादौ करन्यासः

ॐ भूः अङ्गुष्ठाभ्यां नमः। ॐ भुवः तर्जनीभ्यां नमः। ॐ स्वः मध्यमाभ्यां नमः। ॐ तत्सवितुर्वरेण्यम् अनामिकाभ्यां नमः। ॐ भर्गो देवस्य धीमहि कनिष्ठिकाभ्यां नमः। ॐ धियो योनः प्रचोदयात् करतलकरपृष्ठाभ्यां नमः।

### अथ अङ्गन्यासः

ॐ भूः हृदयाय नमः। ॐ भुवः शिरसे स्वाहा। ॐ स्वः शिखायै वषट्। ॐ तत्सवितुर्वरेण्यम् कवचाय हुम्। ॐ भर्गो देवस्य धीमहि नेत्रत्रयाय वौषट्। ॐ धियो योनः प्रचोदयात् अस्त्राय फट् ॥

## (ठ) गायत्र्यावाहनम्

ॐ तेजोसीत्यस्य परमेष्ठी प्रजापतिर्ऋषिः। आज्यं देवता जगती छन्दः। यजुर्गायत्र्यावाहने विनियोगः।

ॐ तेजोसि शुक्रमस्यमृतमसि धामनामासिप्प्रियन्देवानामना धृष्टन्देवयजनमसि ॥

## (ड) गायत्र्युपस्थानम्

ॐ तुरीयपदस्य विमलऋषिः परमात्मा देवता। गायत्री छन्दः गायत्र्युपस्थाने विनियोगः।

ॐ गायत्र्यस्येकपदी द्विपद्वी त्रिपदी चतुष्पद्यपदसि नहि पद्यसे। नमस्ते तुरीयाय दर्शताय पराय परोरजसेऽसावदो मा प्रापत् ॥

## (ढ) गायत्रीध्यानम्

ॐ मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्षणै
र्युक्तामिन्दुकलानिबद्धमुकुटां तत्त्वात्मवर्णात्मिकाम्।
गायत्रीं वरदाभयाङ्कुशकशा शुभ्रं कपालं गुणं
शङ्खंचक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे ॥

ध्यानानन्तरम् (प्रातः कालिकम्)

ब्रह्माणी चतुराननाक्षवलयं कुम्भं करैः स्रुक्स्रुवौ
बिभ्राणारुणकान्तिरिन्दुवदना ऋग्रूपिणी बालिका।
हंसारोहणकेलिरम्बरमणेर्बिम्बाञ्चिता भूषिता
गायत्री हृदि भाविता भवतु नः सम्पत्समृद्धयै सदा॥

तथा–(मध्यान्हकालिकं ध्यानम्)

रुद्राणी नवयौवना त्रिनयना वैयाघ्रचर्माम्बरा
खट्वाङ्गत्रिशिखाक्षसूत्रवलया भीतिर्दधानाम्बिका।
विद्युत्पुञ्जजटाकलापविलसद्बालेन्दुमौलिः सदा
सावित्री वृषवाहना सिततनुर्ध्येया यजूरूपिणी॥

तथा (सायङ्कालिकं ध्यानम्)

वृद्धा नीलघनप्रभापरिलसत्पीताम्बरा भूषिता
दिव्यैराभरणैरथाङ्गकमले शङ्खं गदां बिभ्रती।
तार्क्षस्कन्धगता समस्तजगदाराध्या परा वैष्णवी
ध्येया चैव सरस्वती भगवती सामस्वरूपा सदा॥

## (ण) गायत्रीजपः

ॐ प्रणवस्य ब्रह्मा ऋषिः परमात्मा देवता, गायत्री छन्दः, व्याहृतीनां प्रजापतिर्ऋषिः, अग्निवायुसूर्या देवताः गायत्री छन्दः। तत्सवितुरित्यस्य विश्वामित्र ऋषिः, सविता देवता, गायत्री छन्दः, सर्वपापक्षयार्थे गायत्रीमन्त्रजपे विनियोगः।

ॐ भूर्भुवः स्वः तत्सवितु०।

(समग्रमन्त्रोच्चारणपूर्वकं जपः)

## (त) जपसमर्पणम्

ॐ देवा गातुविद इत्यस्य मनसस्पतिर्ऋषिः, वातोदेवताः, विराट् छन्दः, जपनिवेदने विनियोगः।

**ॐ देवा गातुविदो गातुं वित्त्वा गातुमित। मनसस्पत ऽइमन्देव यज्ञ ꣳ स्वाहा वाते धाः॥**

अनेन प्रातः सन्ध्याङ्गभूतेन (अमुकसंख्याकेन) गायत्रीमन्त्रजपाख्येन कर्मणा श्रीभगवान् ब्रह्मस्वरूपी सूर्यनारायणः प्रीयताम् न मम॥

## (थ) सन्ध्याविसर्जनम्

ॐ उत्तरे शिखरे इत्यस्य कश्यपऋषिः, सन्ध्यादेवताः, अनुष्ठुप् छन्दः, सन्ध्याविसर्जने विनियोगः।

ॐ उत्तरे शिखरे देवि भूम्यां पर्वत मस्तके।
ब्राह्मणेभ्यो विनिर्मुक्ता गच्छ देवि यथा सुखम्॥

॥इति सामान्य सन्ध्याविधिः॥

## अभ्यासः

१– भस्मधारणपवित्रधारणमन्त्रयोः प्रतीकमात्रं लेख्यम् ।

२– 'पृथ्वी त्वया' अस्य मन्त्रस्य कुत्र कस्मिन् कर्मणि विनियोगः ?

३– 'तेजोसि, गायत्र्यस्येकपदी' इमौ मन्त्रौ कुत्र विनियुज्येते ?

४– जपसमर्पणमन्त्रं लिखत ।

५– 'देवा गातुविदः' कस्मिन्कर्मणि विनियुक्तोऽयं मन्त्रः ?

खण्ड २ (क)

# अथ संक्षिप्तयज्ञोपवीतधारणविधिः

आचम्य प्राणानायम्य यज्ञोपवीतं प्रक्षाल्य

ॐ अद्येत्यादि– मम श्रौतस्मार्तकर्मानुष्ठानसिद्धयर्थं (अमुक) कर्माङ्गत्वेन नूतनयज्ञोपवीतधारणमहं करिष्ये। इति सङ्कल्प्य यज्ञोपवीतानि करसम्पुटे धारयित्वा दशवारं गायत्रीमन्त्रैरभिमन्त्रयेत्।

ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतीमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥
यज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि।

इति मन्त्रेणैकं यज्ञोपवीतं दक्षिणहस्तेन धारयित्वा पुनराचम्य अनेनैव मन्त्रेण द्वितीयं यज्ञोपवीतं धारयेत्। प्रतियज्ञोपवीतधारणान्ते आचमनम्।

ॐ एतावद्दीनपर्यन्तं ब्रह्मत्वं धारितं मया।
जीर्णत्वात्तत्परित्यागो गच्छ सूत्र यथासुखम्॥

इति मन्त्रेण जीर्णं यज्ञोपवीतं शिरोमार्गेण निष्कास्य क्वचित्पवित्रस्थले भूमौ त्यजेत्। यज्ञोपवीतधारणानन्तरं यथाशक्ति गायत्रीर्जपेत्।

'अर्पणम्'– अनेन नूतनयज्ञोपवीतधारणार्थे कृतेन यथाशक्ति गायत्रीजपाख्येन कर्मणा श्रीसूर्यनारायणः प्रीयतां न मम। ॐ तत्सःब्रम्हार्पणमस्तु।

(इति संक्षिप्तयज्ञोपवीतधारणविधिः।)

खण्ड २ (ख)

# अथ संक्षिप्त भोजनविधिः

सोत्तरीयं धौतं वस्त्रं परिधाय हस्तौ पादौ प्रक्षाल्य शुद्धासने प्राङ्मुख उपविश्याऽऽचम्य भोजनपात्रेऽन्नं परिविष्य

यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति ।
एवं मण्डल भस्मैतत्सर्वभूतानि रक्षतु ॥

इति मन्त्रेणान्नं परितः भस्मना जलेन वा चतुष्कोणमण्डलं[1] विधाय

**ॐ पितुन्नु स्तोषं महो धर्माणन्तविषीम् । यस्पत्रितो व्योजसा वृत्रं विपर्वमर्दयत् ।**

इति मन्त्रेणान्नं स्तुत्वा

**ॐ नमः शम्भवाय च मयोभवायच नमः शंकराय च मयस्कराय च नमः शिवाय शिवतराय च ।**

इति मन्त्रेणाभिमन्त्र्य

**ॐ सत्यन्त्वर्तेन परिषिञ्चामि ।**

इति मन्त्रेण प्रातः

**ॐ ऋतं त्वा सत्येन परिषिञ्चामि ।**

इति सापम् ।
जलेन प्रोक्ष्य

**ॐ तेजोसि शुक्रमस्यमृतमसि धाम नामासि प्रियन्देवानामनाधृष्टं देवयजनमसि ।**

---

१–चतुष्कोणं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य मण्डलं वैश्यस्य अभ्युक्षणं शूद्रस्य ।

इत्यभिमृश्यात्मानमग्निं ध्यायेत् ।

ततो भूमौ बलीन् दद्यात् – "ॐ भूपतये स्वाहा । ॐ भुवनपतये स्वाहा । ॐ भूतानां पतये स्वाहा । ॐ चित्राय स्वाहा । ॐ चित्रगुप्ताय स्वाहा । ॐ सर्वेभ्यो भूतेभ्यः स्वाहा । इति ।

ततो हस्ते जलमादाय–

**ॐ अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः । त्वं ब्रम्हस्त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारस्त्वं विष्णोः परमं पदम् ॥ ॐ अमृतोपस्तरणमसि स्वाहा ।**

इति मन्त्रेणार्ध्यं जलं भूमौ बल्युपरि निक्षिप्य शेषमर्घ्यं पिबेत् ।

ततोऽन्नममृतं ध्यायन् मौनीभूत्वा हस्तचापल्यादिरहितो मुखे पञ्च प्राणाहुती जुहुयात् ।

ॐ प्राणाय स्वाहा । ॐ अपानाय स्वाहा । ॐ व्यानाय स्वाहा । ॐ समानाय स्वाहा । ॐ उदानाय स्वाहा ।१ इति पञ्चमन्त्रैः पञ्चग्रासान् जिह्वया ग्रसेद्दन्तैर्नोपस्पृशेत् । प्राग्द्रवरूपमश्नीयान्मध्ये कठिनमन्ते पुनर्द्रवाशी स्यात् । पूर्वं मधुरं मध्ये लवणाम्लौ पश्चात्कटुतिक्तादिकान् यथासुखं भुञ्जीत ।

एवं यथारुचि भुक्त्वा भुक्तशेषमन्नमादाय

ॐ मद्भुक्तोच्छिष्टशेषं ये भुञ्जते पितरोऽधमाः ।
तेषामन्नं मया दत्तमक्षय्यमुपतिष्ठत ॥ इति

इति पितृतीर्थेन भूमौ दत्त्वा हस्ते जलमादाय

**ॐ अमृतापिधानमसि स्वाहा ।**

इत्यर्ध्यं पीत्वा ।

---

१–समानाय स्वाहोदानाय स्वाहेति क्रमं याज्ञवल्क्यो मन्यते । उदानाय स्वाहा समानाय स्वाहा । इति शौनकबौधायनो । याज्ञवल्क्योदितक्रमो वाजसनेयिनाम् ।

ॐ रौखे पूपनिलये पद्मार्वुद निवासिनाम् ।
अर्थिनां सर्वभूतानामक्षय्यमुपतिष्ठतु ॥

इत्यर्घ्यं भूमौ निक्षिपेत् ।

ततस्तस्माद्देशादपसृत्य गण्डूषशलाकादिभिर्मुखं शोधयेत् । घृतपायसदधिसक्तुपललमधुभ्योऽन्यद् भोज्यमन्नं किञ्चित्परिशेषयेन्नसर्वभोजीस्यात् ।

ततः

ॐ अगस्त्यं वैनतेयं च शनिं च वडवानलम् ।
आहारपरिणामार्थं स्मरेद्भीमं च पञ्चमम् ॥

इत्युदरमालभ्य

ॐ शर्यातिं च सुकन्यां च च्यवनं शक्रमश्विनौ ।
भोजनान्ते स्मरेन्नित्यं तस्य चक्षुर्न हीयते ॥

इति स्मृत्वा मुखशुद्धिं कुर्यात् ।

॥ इति संक्षिप्तभोजनविधिः ।

खण्ड ३

# पञ्चाङ्गज्ञानम्

## परिचय

तिथि, वार नक्षत्र, योग र करणलाई ज्योतिष–शास्त्रमा पञ्चाङ्ग भनिएको छ। तिथि, वार आदि यिनै पाँच कुराको प्राधान्य भएकाले पात्रोलाई पञ्चाङ्ग भन्ने गरेको हो। हामीले पञ्चाङ्ग शब्दबाट गौण रूपमा पात्रोलाई र प्रधान रूपले त्यसमा उल्लेख गरिएका तिथि, वार, नक्षत्र, योग, करणहरूलाई सङ्केत गरिएको कुरा बुझ्नुपर्दछ। यद्यपि पात्रोमा हाम्रा व्यवहारोपयोगी धेरै कुराहरू संग्रह गरेर राखिएका हुन्छन्, तापनि तिथि, वार, नक्षत्र आदि पञ्चाङ्गसँग कर्मकाण्डको विशेष घनिष्ट सम्बन्ध भएकाले अरू विषयको अपेक्षा यसलाई प्रधानता दिइएको हो।

वैदिक (हिन्दू) धर्म अन्तर्गत हाम्रो कर्मकाण्डमा प्रचलित जति पनि यज्ञ, दान, पूजा, व्रत, चाड, पर्व, जन्मदिवस, पितृश्राद्ध आदि छन् ती सबै प्रायः गरेर चन्द्रमानका आधारमा (अर्थात् यिनै तिथिवार आदि पञ्चाङ्ग अनुसार) चलेका छन्। त्यसैले प्रत्येक कर्ममा गरिने सङ्कल्प वाक्यहरूमा अरू मुहूर्त लग्नहरूको अपेक्षा पञ्चाङ्गको विशेष उल्लेख गरिने शास्त्र तथा शिष्टपरम्परा दुवै देखिएकाले कर्मकाण्डसित पनि पञ्चाङ्गको विशेष सम्बन्ध भएको बुझिन्छ। तर यसको अर्थ छात्रले पात्रो हेर्दा केवल पञ्चाङ्ग मात्र जाने पुग्छ अरू अंश जान्नु पर्दैन भन्ने होइन किन्तु पात्रोमा उल्लेख भएका व्यवहारमा चाहिने सबै कुरा उसले जान्न, बुझ्न सक्ने हुनुपर्दछ। जुनसुकै कर्म गर्दा पनि कर्मको आदिमा सङ्कल्प वाक्य प्रयोग गरिन्छ। सङ्कल्प वाक्यको प्रयोग गर्दा संवत्सर, अयन, ऋतु, महीना, पक्ष, वार, तिथि र नक्षत्र आदिको पनि उल्लेख गर्नुपर्दछ। यसको निमित्त संवत्सर कति छन्, अयन, ऋतु आदि कति छन् र तिनका नाम के-के हुन् भन्ने कुराको ज्ञान हुनुपर्दछ। यसकारण ती संवत्सर आदिका नाम र संख्याहरू यहाँ उल्लेख गरिन्छन्। यहाँ उल्लेख नभएका अन्य कुराहरू छात्रले पञ्चाङ्ग (पात्रो) को अध्ययन गरेर जान्नुपर्दछ।

कर्मकाण्ड अन्तर्गतका यज्ञ, पूजा, दान, व्रत, विवाह, व्रतबन्ध आदि संस्कार जे गरिन्छन् ती प्रत्येक कर्मसँग कर्मफल जोडिएको हुन्छ। कर्म गरेपछि राम्रो या नराम्रो सानो ठूलो जे जस्तो होला केही न केही कर्मफल अवश्य मिल्छ। यद्यपि कर्मको शुद्धाशुद्धिबाट पनि कर्मफलमा भिन्नता अर्थात् राम्रो नराम्रो हुन सक्छ तर तिथि, वार, नक्षत्र, योग, करण, मुहूर्त, लग्न आदि समयको शुद्धाशुद्धि त्यसभन्दा पनि बढी महत्त्व राख्ने हुँदा त्यसमा विशेष विचार गरिनुपर्दछ। कर्मकाण्ड अन्तर्गतका अरू कर्मसँग पञ्चाङ्गको सम्बन्ध जोडिए जस्तै रुद्रीसँग पनि जोडिएको छ। रुद्री गर्दा पञ्चाङ्ग हेरी गर्न हुने र नहुने दिन विचार गरिनुपर्छ। रुद्री जुराउँदा तिथिको

आधारमा जुराइन्छ । शुक्लपक्ष र कृष्णपक्षका कुन-कुन तिथिमा शिवको वास कहाँ हुन्छ र त्यसको फल के मिल्छ भन्ने समेत जान्नुपर्दछ । जस्तो— शुक्लपक्षको प्रतिपदा र अष्टमीको दिनमा शिवजीको वास श्मशानमा हुन्छ र त्यसको फल मृत्यु बताइएकाले यी दुई दिनमा रुद्री गर्न हुँदैन अर्थात् जुर्दैन। शुक्लपक्षको द्वितीया र नवमीको दिनमा शिवजीको वास गौरीका साथमा हुन्छ र त्यसको फल शुभ बताइएकाले यी दिनमा रुद्री गर्न हुन्छ । तिथिको घडी पला पञ्चाङ्गबाटै अवगत गर्नुपर्छ। एवं क्रमले अरू पनि शिववासको फल जान्नुपर्छ । यो कुरा शिववास फलसारिणीबाट जान्न सकिन्छ। उक्त फलसारिणी पञ्चाङ्ग (पात्रो) मा पनि पाइन्छ र जानकारीका लागि यहाँ पनि राखिएको छ––

# (क) रुद्रीपाठे दिवसविचारः

(रुद्री जुराउने)

**रुद्रीपाठे शुभाशुभफलज्ञानाय तिथ्यनुसारेण गणनाक्रमो यथा–**

**शुक्लप्रतिपदा १, शुक्लद्वितीया २, एवं क्रमेण पूर्णिमा १५, कृष्णप्रतिपदा १६, कृष्णद्वितीया १७, एवं क्रमेण अमावास्या ३०, तिथि गणनाक्रमो बोध्यः।**

**शिववासफलम् (मेरुतन्त्रे) ––**

**तिथिं च द्विगुणीकृत्य पञ्चभिश्च समन्वितम् ।**
**सप्तभिश्च हरेद्भागं शिववासफलं लभेत् ॥**
**एके कैलासवासः स्यात् [१] द्वितीये गौरिसन्निधौ ।**
**तृतीये वृषभारूढः सभायां च चतुर्थके ॥**
**पञ्चमे भोजने चैव षष्ठे क्रीडारतस्तथा[२] ।**
**श्मशानेऽद्रौ तथा शेषे[३] शिववासफलं भवेत्[४] ॥**
**कैलासे तु भवेत्सौख्यं गौर्यङ्के च सुखप्रदम्[५] ।**
**वृषारुढे च श्रीप्राप्तिः[६] सभा सन्तापकारिणी[७] ॥**
**भोजने भोजनप्राप्तिः[८] क्रीडा सन्तानहारिणी[९] ।**
**श्मशाने मृत्युमाप्नोति शिववासफलं लभेत् ॥**

---

१– कैलासवासं च, इति पाठान्तरम् । २– क्रीडारतस्तथा, इति पा. । ३– सप्तमे प्रोक्तः, इति पा.। ४– तथा, इति पा.। गौर्यान्तु सुखसम्पदः, इति पा.। ६– वृषभे च श्रियः प्राप्तिः, इति पा.। ७– सभायां तापकारिणी, इति पा.। ८– भोजनं चैव, इति पा. । ९– सन्तापहारिणी, इति पा. ।

# मेरुतन्त्रे शिववास फलसारिणी

| शु० | शिववासः | फलम् | कृ० |
|---|---|---|---|
| १ | श्मशाने | मृत्युः | ७ |
| २ | गौरीसन्निधौ | शुभम् | १ |
| ३ | सभायाम् | सन्तापकारणम् | २ |
| ४ | क्रीडायाम् | सन्तानहानिः | ३ |
| ५ | कैलाशे | सुखम् | ४ |
| ६ | वृषे | श्रीप्राप्तिः | ५ |
| ७ | भोजने | भोजनप्राप्तिः | ६ |
| ८ | श्मशाने | मृत्युः | ० |
| ९ | गौरीसन्निधौ | शुभम् | ८/३० |
| १० | सभायाम् | सन्तापकारणम् | ९ |
| ११ | क्रीडायाम् | सन्तानहानिः | १० |
| १२ | कैलाशे | सुखम् | ११ |
| १३ | वृषे | श्रीप्राप्तिः | १२ |
| १४ | भोजने | भोजनप्राप्तिः | १३ |
| १५ | श्मशाने | मृत्युः | १४ |

## (ख) संवत्सराः

प्रभवादयः षष्टिसंवत्सराः सन्ति । तेषां नामानि यथा–प्रभवः विभवः, शुक्लः, प्रमोदः, प्रजापतिः, अङ्गिराः, श्रीमुखः, भावः, युवा, धाता, ईश्वरः, बहुधान्यः, प्रमाथी, विक्रमः, वृषः, चित्रभानुः, सुभानुः, तारणः, पार्थिवः, व्ययः, सर्वजित्, सर्वधारी, विरोधी, विकृतिः, खरः, नन्दनः, विजयः, जयः, मन्मथः, दुर्मुखः, हेमलम्बी, विलम्बी, विकारी, शार्वरी, प्लवः, शुभकृत्, शोभनः, क्रोधी, विश्वावसुः, पराभवः, प्लवङ्गः, कीलकः, सौम्यः, साधारणः, विरोधकृत्, परिधावी, प्रमादी, आनन्दः, राक्षसः, नलः, पिङ्गलः, कालयुक्तः, सिद्धार्थी, रौद्रः, दुर्मतिः, दुन्दुभिः, रुधिरोद्गारी, रक्ताक्षी, क्रोधनः, क्षयः इति ।

एते संवत्सराः प्रतिवत्सरं चैत्रशुक्लप्रतिपदादारभ्य परिवर्तन्ते ।

## अयने

(अयन)

अयने द्वे भवतः, उत्तरायणं दक्षिणायनञ्चेति । माघमासादारभ्य आषाढमासपर्यन्तं षण्मासाः उत्तरायणम्. श्रावणमासादारभ्य पौषमासपर्यन्तं षण्मासा दक्षिणायनमिति ।

## ऋतवः

(ऋतु)

वसन्तः, ग्रीष्मः, वर्षा, शरद्, हेमन्तः, शिशिरश्चेति षड् ऋतवः सन्ति । एकस्मिन्नेकस्मिन् ऋतौ द्वौ द्वौ मासौ भवतः यथा– चैत्रो वैशाखश्च मासौ वसन्तर्तुः, ज्येष्ठ आषाढश्च ग्रीष्मः, श्रावणभाद्रमासौ वर्षा, आश्विनकार्तिकौ शरद्, मार्गशीर्षपौषमासौ हेमन्तः, माघफाल्गुनौ शिशिरः इति ।

## मासाः

(महिना)

वैशाखादारभ्य चैत्रमासपर्यन्तं द्वादशमासाः भवन्ति । तेषां नामानि यथा– वैशाखः, ज्येष्ठः, आषाढः, श्रावणः, भाद्रपदः, आश्विनः, कार्तिकः, मार्गशीर्षः, पौषः, माघः, फाल्गुनः, चैत्रश्चेति

## पक्षौ

(पक्ष)

शुक्लपक्षः कृष्णपक्षश्चेति द्वौ पक्षौ स्तः। अमावास्या परतः प्रतिपदादारभ्य पूर्णिमापर्यन्तं शुक्लपक्षः। पूर्णिमायाः परतः प्रतिपदादारभ्य अमावास्यापर्यन्तं कृष्णपक्षः इति।

# (ग) तिथयः

(तिथि)

तिथयः षोडश भवन्ति। तेषां नामानि यथा–प्रतिपदा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्दशी, पूर्णिमा, अमावास्या चेति।

## वासराणि

(वार)

सप्त वासराणि भवन्ति। तेषां नामानि यथा–आदित्यः, सोमः, भौमः, बुधः, बृहस्पतिः, शुक्रः, शनिवासरश्चेति।

## नक्षत्राणि

(नक्षत्र)

अश्विन्यादीनि सप्तविंशति नक्षत्राणि भवन्ति। तेषां नामानि यथा–

अश्विनी, भरणी, कृत्तिका, रोहिणी, मृगशिराः, आर्द्रा, पुनर्वसु, तिष्यः, अश्लेषा, मघा, पूर्वाफाल्गुनी, उत्तराफाल्गुनी, हस्तः, चित्रा, स्वाती, विशाखा, अनुराधा, ज्येष्ठा, मूलम्, पूर्वाषाढा, उत्तराषाढा (अभिजित्), श्रवणः, धनिष्ठा, शतभिषक्, पूर्वाभाद्रः, उत्तराभाद्रः, रेवतीति।

## योगाः

(योग)

विष्कम्भादयो योगाः सप्तविंशति सन्ति। तेषां नामानि यथा–

विष्कंभः, प्रीतिः, आयुष्मान्, शौभाग्यः, शोभनः, अतिगंडः, सुकर्माः, घृतीः, शूलम्, गंडः, वृद्धिः, ध्रुवः, व्याघातः, हर्षणः, वज्रः, सिप्रः, (सिद्धः), व्यतीपातः, वरीयान् (वर्याणः), परिघः, शिवः, सिद्धिः, साध्यः, शुभः, शुक्लः, बृह्मा ऐन्द्रः, वैधृतिः, इति ।

## करणानी

(करण)

बवादि सप्तचलकरणानि भवन्ति । तेषां नामानि यथा–

बवः, बालवः, कौलवः, तैत्तिलः, गरः, वणिक्, विष्टिः, इति ।

स्थिरकरणानि चत्वारि सन्ति यथा- शकुनिः, चतुष्पादः, नागः, किंस्तुघ्नः ।

# (घ) सूर्यचन्द्रबृहस्पतीनां तात्कालिक राशिज्ञानम्

(सूर्य, चन्द्र, बृहस्पतिको तात्कालिक राशिज्ञान)

## (१) तत्र सूर्यस्य राशिज्ञानम्

सूर्य एकस्मिन् राशौ एकमासपर्यन्तं तिष्ठति । वैशाखमासादारभ्य चैत्रमास-पर्यन्तं द्वादशमासेषु मेषराशेरारभ्य मीनराशिपर्यन्तं क्रमेण द्वादश राशयो भवन्ति । तेषामुदाहरणानि यथा –

वैशाखे मेषः, ज्येष्ठे वृषः, आषाढे मिथुनः, श्रावणे कर्कटः, भाद्रे सिंहः, आश्विने कन्या, कार्तिके तुला, मार्गशीर्षे वृश्चिकः, पौषे धनुः, माघेः मकरः, फाल्गुने कुम्भः, चैत्रे मीनः (अर्थात् वैशाखमासे सूर्यः मेषराशौ तिष्ठति) इति क्रमानुसारेण बोद्धव्यम् ।

## (२) चन्द्रस्य राशिज्ञानम्

चन्द्रः सार्धद्विदिनपर्यन्तमेकराशौ तिष्ठति । पञ्चाङ्गमवलोक्य चन्द्रस्य राशिज्ञानं कर्तव्यम् ।

## (३) बृहस्पते राशिज्ञानम्

सामान्यतया बृहस्पतिरेकवत्सरपर्यन्तमेकराशौ तिष्ठति । तच्च पञ्चाङ्ग-मवलोक्य बोद्धव्यम् । इति ॥

## अभ्यासः

१. किं नाम पञ्चाङ्गम् ?

२. कति नक्षत्राणि सन्ति ? तेषां नामानि कानि ?

३. कृष्णतृतीयायां रुद्रीपाठं कर्तुं भवति न वेति विचारयत।

४. शुक्लनवम्यां तिथौ रुद्रीपाठस्य फलं किमस्ति ?

५. बृहस्पतिः कियत्कालपर्यन्तमेकराशौ तिष्ठति ?

६. सूर्य एकराशौ कियत्कालं तिष्ठति ?

७. चलकरणनामानि लिखत।

खण्ड ४

# सङ्कल्पः

## (क) विशेषवाक्ययोजनापूर्वकं सङ्कल्पज्ञानम्

## परिचय

वैदिक (हिन्दूधर्म) अनुसार गरिने हरेक कर्मकाण्ड अर्थात् धार्मिक कृत्यहरू यज्ञ, पूजा-दान, संस्कार, श्राद्ध आदि जे जति छन् ती सबै कृत्यहरू सङ्कल्पपूर्वक आरम्भ गरिन्छन् । सङ्कल्प पढ्नुको तात्पर्य हो – आज म यसदिनमा यस स्थानमा बसेर यो कामना लिएर यसरी यस्तो काम गर्दै छु भनेर मनको भाव व्यक्त गर्नु । यहाँ कर्म भन्नाले नित्य, नैमित्तिक, काम्य तीन प्रकारका कर्महरू आउँछन् । यसमा कसैको भनाइ छ – सङ्कल्प किन पढिरहनु ? मनमा सङ्कल्प गरेको छँदैछ, फेरि सङ्कल्पवाक्य पढिरहनुपर्ने किन ? तर जुनसुकै कर्ममा पनि सङ्कल्पवाक्य पढ्नू भन्ने शास्त्रवचन भएको र शिष्टपरम्परा पनि त्यस्तै देखिएको हुँदा सङ्कल्पवाक्य पढ्नै पर्दछ ।

सङ्कल्पवाक्य प्रयोग गर्दा हामीलाई धेरै कुराको जानकारी हुनुपर्छ । अर्थात् यो सृष्टि कसको आज्ञाले वा कहिलेदेखि कसले चलायो, आज कुन कल्प चलिरहेको छ, कुन मनुको पालो छ, कुन युग छ, हामी कुन लोकमा छौं, द्वीप कुन हो, यो स्थान कुन हो, कुन देश, पर्वत र नदीदेखि कतापट्टि पर्छ, संवत्सर, अयन, ऋतु, पक्ष, महीना कुन हो र आजको वार तिथि के हो, ग्रहहरू कुन कुन राशिमा बसेका छन् भन्ने इत्यादि धेरै कुराको बोध आवश्यक छ ।

नित्य, नैमित्तिक, काम्य जुनसुकै यज्ञ, पूजा, दान, संस्कार जे कर्म गर्न लागिएको हो त्यो कर्मको आदिमा प्रतिज्ञासङ्कल्प गरिन्छ । त्यसरी प्रयोग गरिने संकल्पको सामान्य उदाहरण यहाँ प्रस्तुत छ–

**हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ अद्येह श्रीमद्भगवतो महापुराणपुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगतः सृष्टिकारिणो ब्रह्मणो द्वितीये परार्धे श्री श्वेतवाराहकल्पे (प्रह्लादाधिपत्ये) मनौ सप्तमे वैवस्वतमन्वन्तरे सत्यत्रेताद्वापरान्ते बौद्धावतारे अष्टाविंशतितमे कलियुगे तस्य प्रथमचरणे भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्ते गङ्गादेव्या उत्तरदिग्भागे हिमाचलस्य दक्षिणपार्श्वे नेपालदेशे पाशुपतक्षेत्रे पशुपतेः गुह्यकाल्याश्च (अमुक) दिग्भागे (अमुक) नगरे, ग्रामे इह पुण्य-**

भूमौ षष्टिसंवत्सराणां मध्ये (अमुक) नाम्निसंवत्सरे श्रीसूर्ये (अमुकायने) (अमुक) ऋतौ (अमुक) मासे (अमुक) पक्षे (अमुक) तिथौ (अमुक) बासरे (अमुक) राशिस्थिते श्रीसूर्ये (अमुक) राशिस्थिते देवगुरौ (अमुक) राशिस्थिते चन्द्रमसि अन्येषु शेषेषु ग्रहेषु यथा यथा राशिस्थानस्थितेषु सत्सु एवं ग्रहगणविशेषेण विष्टान्वितायां शुभपुण्यतिथौ (अमुक) गोत्रः (अमुक) प्रवरः सपत्नीकः पुत्रादिपरिवारसहितः (अमुक) शर्माहं (नामाहं) सकलपापक्षयपूर्वकं श्रीपरमेश्वरप्रीतये (अमुक) कर्म करिष्ये।

खण्ड ५

# कर्मपात्रनिर्माणम्

## परिचय

हाम्रो कर्मकाण्डमा नित्य, नैमित्तिक, काम्य जे जति कर्म गरिन्छन् ती हरेक कर्ममा एउटा कर्मपात्र बनाउनुपर्दछ । अर्थात् तामाको थाली आदि कुनै पवित्र पात्रमा मन्त्रपूर्वक कुशका पवित्र र कुशका टुक्राहरू जल, चन्दन, अक्षता, जौ, तिल, फूलहरू हालेर जो बनाइन्छ त्यसलाई कर्मपात्र भनिन्छ । त्यस कर्ममा सङ्कल्प गर्नुपर्दा त्यसबाट कुश, जल लिएर गरिन्छ र कहीं जलको प्रयोग गर्नुपर्दा पनि त्यसैबाट लिइन्छ ।

## (क) पवित्रनिर्माणम्

अप्रशीर्णाग्रौद्वौ कुशौ गृहीत्वा प्रादेशमात्र परिमाय तयोरुपरि त्रीणिकुशतरुणानि तिर्यङ निधाय पवित्रमूलेन पवित्रमावेष्ट्य द्वयोर्मूलाग्राणि पवित्रमूलं च दक्षिणहस्तेनादाय पवित्रं च वामहस्तेन गृहीत्वा प्रच्छिद्य पवित्रं च प्रदक्षिणं वारद्वयमावेष्टच ग्रन्थिं कुर्यात् ।

## (ख) कर्मपात्रनिर्माणार्थमावश्यकान्युपकरणानि

(कर्मपात्रका लागि चाहिने अन्य उपकरणको ज्ञान)

कर्मपात्रकरणार्था ताम्रस्थाली एका । कुशपवित्रम् । कुशखण्डाः । जलम् । चन्दनम् । सिन्दूरम् । अक्षताः । यवाः । तिलाः । पुष्पाणि चेति ।

## (ग) कर्मपात्रनिर्माणम्

स्वस्य दक्षिणे ताम्रपात्रं निधाय तत्र–

ॐ यद्देवा देवहेडनन्देवासश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्व ꣳ हसः ॥ यदि दिवा यदि नक्तमेना ꣳ सि चकृमा वयम् । वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्व

ꣳ हसः ॥ यदिजाग्रद्यदिस्वप्न एना ꣳ सि चकृमा वयम् । सूर्यो मा तस्मादेनसो विस्वान्मुञ्चत्व ꣳ हसः ।

इति देवानावाह्य, तत्र पवित्रेस्थ इति मन्त्रेण पवित्रं क्षिपेत्–

ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥

शन्नो देवीरिति जलम्

ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥

गन्ध द्वारामिति चन्दनम्

ॐ गन्धद्वारान्दुराधर्षान्नित्यपुष्टङ्करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपव्हये श्रियम् ॥

अक्षन्नमीमदन्तेत्यक्षताः

ॐ अक्षन्नमीमदन्त ह्यव प्रिया अधूषत ॥ अस्तोषत स्वभानवो विप्रा नविष्ठयामती योजान्विद्र ते हरी ॥

यवोसीति यवान्

ॐ यवोसि यवयास्मद् द्वेषो यवयारातीर्दिवे त्वान्तरिक्षाय त्वा पृथिव्यै त्वा । शुन्धन्तॉंल्लोकाः पितृषदनाः पितृषदनमसि ॥

तिलोसीति तिलान्

ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः ।। प्रत्क्न मद्‌भिःपृक्तः स्वधया पितॄल्लोकान् प्रिणाहिनः ।।

श्रीश्चत इति पुष्पं क्षिपेत्

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्म इषाण सर्वलोकम्म इषाण ।।

ततः कुशत्रयसहितं कर्मपात्रोदकमादाय

ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा ।
यःस्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ।।
ॐ पुण्डरीकाक्षः पुनातु ....... ।

इति द्रव्याणि आत्मानं च सिञ्चेत् । इति ।

खण्ड ६

# अर्घ्यस्थापनम्

## परिचय

जुनसुकै देवताको पूजा गर्दा पनि प्रायः अर्घस्थापना गरिन्छ । अर्घविनाको पूजा अङ्ग-हीन मानिएको छ । अर्घस्थापनाको क्रममा अर्घपात्रमा जल, दूध, दही, कुशका टुक्रा अक्षता, जौ, तिल, सर्स्यूं यति आठ वस्तु र केरा दूबो समेत हालेर पूजा गर्ने विधान छ। यसरी पूजा गरेको अर्घको पूजाविधानमा ठूलो महिमा छ । यसैलाई अष्टाङ्गयुक्त अर्घ भनिन्छ । देवपूजाको स्नान कर्ममा केही प्रयोग गरिन्छ र कर्मको अन्त्यमा कामना पूर्तिको रूपमा शेष अर्घ्य समर्पण गरिन्छ ।

## (क) अर्घ्यस्थापनार्थमावश्यकान्युपकरणानि

(अर्घका लागि चाहिने उपकरणको ज्ञान)

अर्घ्यपात्रम् । त्रिपादिका । जलम् । क्षीरम् । दधि । कुशाग्राणि । अक्षताः । यवाः । तिलाः । सर्षपाः । दूर्वाङ्कुराणि । चन्दनम् । पुष्पाणि । सिन्दूरम् । अभिरकम् ॥

## (ख) अर्घ्यस्थापनम्

स्वस्य दक्षिणे भागे पिष्टातकेन त्रिकोणं षट्कोणं वा विलिख्य तत्र त्रिपादिकां निधाय तस्योपरि अर्घ्यपात्रं संस्थाप्य तस्मिन् पात्रे–जलम्, क्षीरम्, दधि, कुशाग्राणि, अक्षताः, तिलान्, यवान्, सर्षपान्, दूर्वाङ्कुराणि च प्रक्षिप्य गन्धपुष्पादिभिः सम्पूज्य–

ॐ गङ्गे च यमुने चैव गोदावरी सरस्वति ।
नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

इति मन्त्रेणाङ्कुशमुद्रया सूर्यमण्डलाद् गङ्गादिनदीरावाह्य धेनुमुद्रयाऽमृतीकृत्य मत्स्यमुद्रयाऽऽच्छाद्य तत्रस्थजलेन पूजासामग्रीं प्रोक्षेत् । इति ॥

# रङ्गवल्ली रचना

## (क) रुद्राभिषेकार्था रङ्गवल्ली रचना
(रुद्रीका लागि रङ्गवल्ली रचना)

## परिचय

रेखी हाल्ने विधिलाई रङ्गवल्ली रचना भनिन्छ । रङ्गवल्ली रचना गर्नु अर्थात् रेखी हाल्नु एक प्रकारले आसन विशेषको कल्पना गर्नु हो । देवताको पूजा क्रममा शास्त्रमा बताए अनुसार आसनको ठूलो महत्त्व देखिन्छ । विशेष अथवा सामान्य जे जस्तो कर्म गरिन्छ रेखी पनि सोही अनुसारको हुन्छ । यसैले हाम्रो याज्ञिक परम्परामा विशेष अनुष्ठानहरूमा विशेष रूपको र सामान्य रेखी हाल्ने प्रचलन पाइन्छ । शिवजीको विशेष अनुष्ठान गरिदा चर्तुलिङ्गतोभद्र द्वादशलिङ्गतोभद्र रचना गर्ने (रेखी भित्र चार लिङ्ग अथवा बाह्र लिङ्ग लेखिन्छन् ) तथा विष्णुको विशेष अनुष्ठानमा सर्वतोभद्र रचना गर्ने गरिन्छ ।

सोही अनुसार रुद्राभिषेकलाई सामान्य कर्मको रूपमा लिई सामान्य रूपबाट नै यहाँ रङ्गवल्ली (रेखी) को स्वरूप दिइएको छ––




आसन

खण्ड ८

# रुद्राभिषेक:

## परिचय

हाम्रो वैदिक हिन्दू समाजमा चलेका कर्मकाण्डहरू अन्तर्गतको अतिप्रचलित र उत्कृष्ट कर्म हो रुद्राभिषेक। रुद्राभिषेक शान्तिक तथा पौष्टिक कर्म दुवैमा गर्ने गरिएको छ। विशिष्ट धनधान्य सम्पन्न व्यक्तिले जुन भावनाले रुद्राभिषेक गर्दछ, एक सामान्य व्यक्तिले पनि उस्तै भावनाले गर्दछ। आर्थिक दृष्टिमा धनी गरीबमा भिन्नता भए पनि भावनात्मक दृष्टिमा दुवै बराबरीमा आउन सक्तछन्।

भगवान् रुद्रको आराधना गर्ने क्रममा रुद्रीपाठका तीन रूप बताएका छन्। अभिषेकात्मक, हवनात्मक र जपात्मक। जलधारापूर्वक रुद्रीपाठ गरिनेलाई अभिषेकात्मक, रुद्रीका मन्त्रपाठ गर्दै होम गर्दै गर्नेलाई हवनात्मक, यसलाई रुद्रहोम पनि भन्दछन् र जलधारा पनि होम पनि नगरी केवल रुद्रीपाठ मात्र गरिनेलाई जपात्मक भनिन्छ।

**रुद्रीका पाँच भेद छन्-** रुद्र, रुद्री, लघुरुद्र महारुद्र र अतिरुद्र। एकावृत्ति रुद्रीपाठ गरिनेलाई रुद्र, त्यसको ११ गुणा अर्थात् ११ आवृत्तिलाई रुद्री अथवा रुद्रैकादशिनी, त्यसको ११ गुणा अर्थात् १२१ आवृत्तिलाई लघुरुद्र,, त्यसको ११ गुणा अर्थात् १३३१ आवृत्तिलाई महारुद्र र त्यसको पनि ११ गुणा अर्थात् १४६४१ आवृत्तिलाई अतिरुद्र भनिन्छ।

धर्म, अर्थ (धन), काम (सन्तान) मोक्ष यी चारै कुराको इच्छा गर्नेहरूले रुद्रीपाठद्वारा आशुतोष भगवान् रुद्रलाई प्रसन्न गराएर आफ्नो इच्छापूर्ण गर्दछन्। अभिषेकात्मक रुद्री-पाठमा कामना विशेषले अभिषेक द्रव्य पनि भिन्नभिन्न बताएको छ। वृष्टि कामना गर्ने र ज्वरोको प्रकोप शान्त गराउन इच्छा गर्नेहरूले जलधाराद्वारा, पशुधनको इच्छा गर्नेले दहीको धाराद्वारा, पुत्रको इच्छा र प्रमेह रोग शान्ति गर्ने, तथा दीर्घायु बनौं भन्ने इच्छा हुनेहरूले दूधको धाराद्वारा, पापनाश गर्ने र निरोगी बनौं भन्ने इच्छा गर्नेहरूले क्रमैले मह र घिउको धाराद्वारा, मोक्षको इच्छा हुनेले तीर्थजलको धाराद्वारा, शत्रुनाश गर्ने इच्छुकले सस्यूँको तेलको धारा गरेर रुद्रीपाठ गर्नु वा गराउनु भनिएको छ।

जलधारा क्रममा तामाको जलहरीद्वारा गरिन्छ र अर्को गौरीगाईको सिङले जलधारा गर्नू भन्ने पनि छ र सोही अनुसार सिङले पनि जलधारा गरिन्छ।

जुनसुकै कर्ममा पनि एउटा मुख्य कर्म हुन्छ र अरू त्यसमा सहयोगीका रूपमा गरिने अङ्गकर्म हुन्छन्। केही गरी अङ्ग कर्ममा त्रुटि हुन गए पनि प्रधानकर्ममा त्रुटि हुन हुँदैन। यहाँ

रुद्राभिषेक जलधारा पूर्वक रुद्रीपाठ गर्नु मुख्य कर्म हुन्छ, अरू वरण, पुण्याहवाचन, दीप, कलश, गणेश पूजाहरू सबै अङ्ग कर्मका रूपमा हुन्छन् । सबै अङ्ग कर्मले प्रधान कर्म–रुद्राभिषेकलाई सहयोग गर्दछन् ।

रुद्रीपाठद्वारा तमोमूर्ति महारुद्र प्रसन्न हुनुहुन्छ र रुद्रकोप शान्त हुन्छ । जब रुद्र कुपित हुनुहुन्छ त्यसबेला उहाँबाट यौटा कुनै त्यस्तो भयङ्कर कोपज्वाला निस्कन्छ र त्यो कोपज्वाला परमाणु रूप लिएर यसरी सर्वत्र व्याप्त भएर फैलिन्छ कि जो गगनमण्डल, वायुमण्डल, जल, स्थल, अन्न आदिमा सर्वत्र छरिएर रहन्छ । यसै गरी उहाँले प्रहार गर्नुभएका वाणहरू पनि सर्वत्र छरिएका हुन्छन् । यस्तो रुद्रको कोपज्वाला वा वाणको प्रचण्ड प्रहारमा जब मनुष्य वा पशुपक्षी कुनै पर्दछ भने त्यो कहिल्यै पनि कुशल, मङ्गलमय र स्वस्थ रहन सक्तैन । यस्तो प्रहारबाट बच्न भगवान् रुद्रलाई प्रसन्न गराउनुपर्दछ । रुद्रलाई प्रसन्न तुल्याउने सबभन्दा उत्तम साधन रुद्रीपाठ नै हो । रुद्रीपाठद्वारा भगवान् रुद्र ज्यादै चाँडो प्रसन्न हुनुहुन्छ ।

अभिषेकात्मक रुद्रीलाई रुद्राभिषेक भनिन्छ । यसमा तामाका जलहरी वा गौरी गाईको सिङले जलको धारा दिएर रुद्रीपाठ हुन्छ । रुद्राभिषेक गरिँदा यस क्रमले प्रधान कर्म र अङ्ग कर्महरू गरिन्छन्–

# अथ रुद्राभिषेकविधिः[1]

## श्रीगणेशाय नमः । श्री मङ्गलमूर्तये नमः ।

## तत्रादौ मङ्गलाचरणम्

**यजमानः पूर्वाभिमुखः स्वासन उपविश्य आचम्य प्राणानायम्य मङ्गलोच्चारणं कुर्यात् ।**

---

१– रुद्रः पञ्चविधः– रुद्र रुद्री (रुद्रैकादशिनी वा) लघुरुद्रः, महारुद्रः, अतिरुद्रः इति ।

(क) तत्र रुद्र इति =''गणानान्त्वा'' इत्यारभ्य ''तच्चक्षुः'' इत्यन्तमेकावृत्ति रुद्राध्याय पाठः । अस्यैव 'षडङ्गरुद्री' इत्यपि नामान्तरम् (१ आवृत्तिः)

(ख) रुद्री (रुद्रैकादशिनी) एकादशावृत्तिपाठः (११ आवृत्तिः)

(ग) लघुरुद्रः=रुद्रैकादशिन्या एकादशगुणावृत्तिः (११×११=१२१ आवृत्तिः)

(घ) महारुद्रः=लघुरुद्रस्यैकादशगुणावृत्तिः (१२१×११=१३३१ आवृत्तिः)

(ङ) अतिरुद्रः=एकादशगुणमहारुद्रावृत्तिः (१३३१×११=१४६४१ आवृत्तिः)

ॐ श्रीमन्महागणाधिपतये नमः । ॐ इष्टदेवताभ्यो नमः । ॐ कुलदेवताभ्यो नमः । ॐ ग्रामदेवताभ्यो नमः । ॐ सर्वेभ्यो देवेभ्यो नमः । ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः ।

ॐ सुमुखश्चैकदन्तश्च कपिलोगजकर्णकः ।
लम्बोदरश्चद विकटो विघ्ननाशो गणाधिपः ।
धूम्रकेतुर्गणाध्यक्षो भालचंद्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे संकटे चैव विघ्नस्तस्य नजायते ॥
शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
अभीप्सितार्थं सिद्धयर्थं पूजितो यः सुरासुरैः ।
सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥

॥ इति मङ्गलाचरणम् ॥

## (क) वरणम्

वरणको अर्थ हो– जुनसुकै आफूले गर्न लागेको कर्ममा त्यस कर्मको सञ्चालनका निम्ति कुनै पदमा राखी त्यसको अधिकार दिनु । (रुद्राभिषेकमा पाठकको पदमा राखी रुद्री पाठको अधिकार दिइन्छ) । यसरी वरण गर्दा--धोती, उपर्ना, गन्जी, वा भोटो, पञ्चपात्र, आसनी औंठी आदि आफूले जेजस्तो ब्राह्मणलाई दिन सकिन्छ ती सबै कुरा राखी यस काममा म तपाईंलाई यस पदमा राखी वरण गर्दछु भनी सङ्कल्प पढिन्छ र पछि टीका लगाएर ती वस्तुहरू दिइन्छन् ।

कर्मपात्रं कृत्वा गन्धपुष्पाक्षतफलवस्त्रद्रव्यादि वरणसामग्रीं सम्पाद्य, यवकुशजलान्यादाय वरणसामग्रीं च हस्तेनादाय वरणङ्कल्पं कुर्यात् ।

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ अद्येह श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकल जगतः सृष्टिकारिणो ब्रह्मणो द्वितीये परार्धे श्रीश्वेतवाराहकल्पे प्रल्हादाधिपत्ये मनौ सप्तमे वैवस्वतमन्वन्तरे सत्यत्रेताद्वापरान्ते बौद्धावतारे

अष्टाविंशतितमे कलियुगे तस्य प्रथमचरणे भूर्लोके जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गते गङ्गादेव्या उत्तरदिग्भागे हिमाचलस्य दक्षिणपार्श्वे नेपालदेशे पाशुपतक्षेत्रे पशुपतेः गुह्यकाल्याश्च (अमुक) दिग्भागे (अमुक) ग्रामे इह पुण्यभूमौ षष्ठी संवत्सराणां मध्ये (अमुक) नाम्निसंवत्सरे श्रीसूर्ये (अमुकायने) (अमुक) ऋतौ (अमुक) मासे (अमुक) पक्षे (अमुक) तिथौ (अमुक) वासरे (अमुक) राशि स्थिते श्रीसूर्ये (अमुक) राशिस्थिते देवगुरौ (अमुक) राशिस्थिते चन्द्रमसि अन्येषु शेषेषु ग्रहेषु यथा यथा राशिस्थानस्थितेषु सत्सु एवं ग्रहगणविशेषेण विशिष्टान्वितायां शुभपुण्यतिथौ (अमुक) गोत्रस्य (अमुक) प्रवरस्य (अमुक) शर्मणो मम (अमुकनाम्नो मम) सभार्यस्य सपुत्रपौत्रस्य सकुटुम्बस्यायुरारोग्यैश्वर्योत्तरोत्तरहर्षविजयोदयपूर्वकदारिद्र्यदुखःदुर्भिक्ष्यदौर्मनस्यदौर्भाग्योपसर्गमहामारीत्रासोल्कापातनिर्घातभूकम्पादिसूचितसकलदोषोपशान्त्यर्थं दुःस्वप्नसुस्वप्नतावाप्तिपूर्वकबालग्रहदशान्तर्दशादोषोपशमनार्थं बाह्याभ्यन्तरज्वरातिसारापस्मारश्वासकासादिसमस्तरोगाणां झटितिनिवृत्तिपूर्वकमारोग्यतावाप्तये विशेषतः आध्यात्मिकाधिदैविकाधिभौतिकादितापत्रयोपशमनपूर्वकधर्मार्थकाममोक्षादिचतुर्विधफलप्राप्तये श्रीपरमेश्वरसाम्बसदाशिवप्रीतये दीपकलशगणेशपूजनपूर्वकं श्रीसाम्बसदाशिवोपरि अविच्छिन्नजलधारया (दुग्धादि धारया वा) (अमुक) सङ्ख्याकब्राह्मणद्वारा (अमुक) रुद्राभिषेकं कर्तुं तथा श्रीमहाकालीमहालक्ष्मीमहासरस्वतीप्रीतये मार्कण्डेयपुराणान्तर्गत "सप्तशती" स्तोत्रस्य साङ्गोपाङ्ग (संपुटित) पाठकर्तुं (अमुक) गोत्रम् (गोत्रान् वा) (अमुक) शर्माणं (शर्मणो वा) ब्राह्मणम् (ब्राह्मणान् वा) एभिश्चन्दनपुष्पाक्षतफलवस्त्रद्रव्यादिभिरहं वृणे । ॐ वृतोस्मि (वृतास्मः वा) इति प्रतिवचनम् । यथा विहितं कर्म कुरु (कुरुत वा) । करवाणि (करवामः वा) इति प्रतिवचनम् ।

इति ब्राम्हणवरणम्

ततो हस्ते सर्षपाक्षतान् गृहीत्वा–

ॐ अपसर्पन्तु ते भूता ये भूता भूमिमाश्रिताः ।
ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् ।
सर्वेषामविरोधेन शिवकर्म समारभे ।।

इति पठन् देवयजनभूमौ सर्वत्र विकिरेत् । तत ईश्वरवन्दनेनात्मरक्षां कुर्यात् । तत्र क्रमः-

ॐ ईश्वराय नमः इति पूर्वे । ॐ आग्नेयेश्वराय नमः आग्नेये । ॐ यमेश्वराय नमः दक्षिणे । ॐ निऋतीश्वराय नमः नैऋत्ये । ॐ वरुणेश्वराय नमः पश्चिमे । ॐ वायव्येश्वराय नमः वायव्ये । ॐ सोमेश्वराय नमः उत्तरे । ॐ ईशानेश्वराय नमः ईशाने । ॐ व्योमेश्वराय नमः ऊर्ध्वायाम् । ॐ अनन्तेश्वराय नमः भूमौ । ॐ सर्वेश्वराय नमः सर्वतः । "ॐनमो भगवते रुद्राय" इति मन्त्रेण प्राणायामत्रयं कुर्यात् । तत्र पूरके ३६, कुम्भके १२, रेचके १२ इति मन्त्रसङ्ख्या ॥

## (ख) पुण्याहवाचनम्

### परिचय

यजमानको अभ्युदयवृद्धिका निमित्त पुण्यहवाचनकर्म गरिन्छ । यस कर्ममा ब्राह्मणलाई वस्त्र, द्रव्य, सुपारी, फल, दूवो आदि जो दिन सकिन्छ त्यो दिइन्छ र ब्राह्मणहरूद्वारा मङ्गलमय अभ्युदय कारक मन्त्रहरू पढिन्छन् ।

पुण्याहवाचनार्थं पूर्वोक्तरीत्या चतुरः पञ्च वा ब्राह्मणान् वृत्वा प्राङ्मुखो यजमानः कृताञ्जलिः– हरि ॐ तत्सत् ३ ॐ विष्णुः ३ पूर्वसङ्कल्प सिद्धिरस्तु (अमुक) गोत्रस्य (अमुक) प्रवरस्य (अमुक) शर्मणो मम अभीष्टफलावाप्तये करिष्यमाण (अमुक) रुद्राभिषेककर्मणि मम गृहे भो ब्राह्मणाः ? ॐ पुण्याहं भवन्तो ब्रुवन्तु ३ । इति त्रिवारं पठेत् । ब्राम्हणाश्च ॐ पुण्याहम् ३ । इति त्रिः पठेयुः । ततो ब्राम्हणाः–

ॐ पुनन्तुमा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ।

ततो यजमानः पूर्ववत्सङकल्पमुच्चार्य-- (अमुक) रुद्राभिषेककर्मणि मम गृहे भो बृाम्हणाः ॐ स्वस्ति भवन्तो ब्रुवन्तु ३ स्वस्तिः ३ ।

ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः । स्वस्तिनस्ताक्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥

यजमानः-- पूर्ववत्सङकल्पमुच्चार्य-- (अमुक) रुद्राभिषेककर्मणि मम गृहे भो बृाम्हणाः- ॐ ऋद्धि भवन्तो ब्रुवन्तु ३ । ॐ ऋद्धिः ३ ।

ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम । दिवं पृथिव्याऽअध्यारुहामा विदाम देवान्त्स्वर्ज्ज्योतिः ॥

यजमानः- पूर्ववत्सङकल्पमुच्चार्य- (अमुक) रुद्राभिषेककर्मणि मम गृहे भो ब्राम्हणाः- ॐ वृद्धि भवन्तो ब्रुवन्तु । ॐ वृद्धिः ३ ।

ॐ ज्यैष्ठ्यं च मऽआधिपत्यं च मे मन्युश्च मे भामश्च मे मश्च मेऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे प्रथिमा च मे वर्षिमा च मे द्राघिमा च मे वृद्धं चमे वृद्धिश्च मे यज्ञेन कल्पन्ताम् ॥

यजमानः- पूर्ववत्सङकल्पमुच्चार्य- (अमुक) रुद्राभिषेककर्मणि मम गृहे भो ब्राम्हणाः- ॐ कल्याणं भवन्तो ब्रुवन्तु । ॐ कल्याणम् ३ ।

ॐ यथे मां वाचं कल्याणी मावदानि जनेभ्यः । ब्रम्हराजन्याभ्याꣳशूद्राय चार्याय च स्वाय चारणाय च ॥ प्रियो देवानां दक्षिणायै दातुरिह भूया समयम्मे कामः समृद्धयतामुपमादो नमतु ॥

यजमानः- पर्वसङकल्पमुच्चार्य- (अमुक) रुद्राभिषेककर्मणि मम गृहे भो ब्राम्हणाः ॐ शान्ति भवन्तो ब्रुवन्तु ३ । ॐ शान्तिः ३ ।

ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ।। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रम्ह शान्तिः सर्व ँशान्तिः शान्तिरेव शान्तिः सामा शान्तिरेधि ।।

यजमानः– पूर्ववत्सङ्कल्पमुच्चार्यः– (अमुक) रुद्राभिषेककर्मणि मम गृहे भो ब्राम्हणाः– ॐ श्रियं भवन्तो ब्रुवन्तु ३। ॐ श्रीः३ ।

ॐ मनसः काममाकूतिं वाचः सत्यमशीय । पशूना ँ रूपमन्नस्य रसो यशः श्रीः श्रयताम् ।।

इति मन्त्रान् पठित्वा–

श्रीर्वर्चस्वमायुष्यमारोग्यमाभिधात् पवमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्गमाऽऽयुः ।।
मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयोऽस्तु व ।
अव्याधिना शरीरेण मनसा च निराधिना ।
पूरयन्नर्थिनामाशास्त्वं जीव शरदां शतम् ।।

इति पठन्तः पूगीफलादीनि यजमान समर्पयेयुः ।

।। इति पुण्याहवाचनम् ।।

## (ग) अथ दीपपूजा

ततो यजमान आचार्यो वा दीपकलशगणेशादीन् पूजयेत्

### परिचय

हाम्रा वैदिक कर्ममा जुनसुकै कर्म गर्दा पनि पिशाच राक्षस आदि विघ्नकारक तत्त्वहरू– देखि सावधान भएर कर्म गर्ने गरिन्छ। याज्ञिक परम्परामा विघ्नकारक तत्त्वहरूका साथै तिनका निराकरणका उपायहरू पनि पत्ता लगाइएका छन् जस मध्ये दीपपूजा पनि एक हो। कर्मस्थानमा बत्ती बालेर राखेपछि कुनै पनि विघ्नकारक तत्त्वहरू त्यहाँ आउन र विघ्न गर्न

समर्थ हुँदैनन्। यसकारण बत्ती बालेर राखिन्छ। दीयो बाल्दा देवकार्यमा पूर्व फर्काउनु ज्यादै उत्तम कुरा हो र धेरै पूर्वतिर फर्काएर राख्छन् पनि। कसैकसैको भनाइमा जतातिर देवता रहन्छन् त्यतैतिर फर्काउनुपर्छ भन्ने छ। यसलाई पनि नराम्रो भन्न सकिँदैन। कारण–बत्ती जतातिर फर्के पनि त्यसको प्रकाश त सबैतिर फैलिएको हुन्छ र त्यसले आफूले गर्ने काम पनि गरिहाल्दछ। रुद्राभिषेकमा पूर्वतिरको त्रिशूल रेखीमा चामलको टपरीमा राखेर दीयोको पूजा गरिन्छ।

**ॐ पृष्टो दिवि पृष्टोऽअग्निः पृथिव्यां पृष्टो विश्वाऽओषधीराविवेश। वैश्वानरः सहसा पृष्टोऽअग्निः सनो दिवा सरिषस्पातु नक्तम्॥**

**इति मन्त्रेण दीपं प्रज्ज्वाल्य**

ॐ नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुवाहवे।
सस्रहनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः॥

इति पूजयेत्। ततो हस्ते पुष्पादीन्यादाय

ॐ नमः कमलनाभाय नमस्ते जलशायिने।
नमस्ते केशवानन्त वासुदेव नमोऽस्तुते॥
वासनाद्वासुदेवस्य वासितं भुवनत्रयम्।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तुते॥
शुभं भवतु कल्याणमारोग्यं सुखसम्पदः।
सर्वशत्रुविनाशाय दीपज्योतिर्नमोऽस्तुते।
इति प्रार्थयेत्।

## (घ) कलशपूजा

### परिचय

यो कलश वेदीको ईशान तर्फ राखिन्छ। यसैले यसलाई ईशानकलश भन्दछन् र यसै कलशको जलले कर्मसमाप्तिमा शान्ति अभिषेक गरिन्छ, यस कारण यसलाई शान्तिकलश पनि भन्दछन्। यस कलशमा वरुण देवताको पूजा गरिन्छ र गणपत्यादि देवताहरूको पनि यसैमा पूजा हुन्छ।

अथ भूरसीति भूमि शोधनम्–

ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री। पृथिवींयच्छ पृथिवीन्दृ ꣳ ह पृथिवीं माहि ꣳसीः ॥

धान्यमसीति धान्यं स्थापयेत्–

ॐ धान्यमसि धिनुहि देवान् प्राणायत्वो दानायत्वा व्यानायत्वा। दीर्घामनु प्रसितिमायुषे धान्देवोवः सविता हिरण्यपाणिः प्रति गृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनां पयोसि ॥

आजिघ्रेति कलशं स्थापयेत्–

ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः। पुनरूर्जा निवर्तस्व सानः सहस्रन्धुक्ष्वोरुधारा पयस्वती पुनर्मा विशताद्रयिः।

इमम्मे वरुणेति तीर्थादि जलं प्रक्षिपेत्–

ॐ इमम्मे वरुणश्रुधी हवमद्या च मृडय। त्वामवस्युराचके ॥

या ओषधीरिति सर्वौषधीः प्रक्षिपेत्

ॐ याऽओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा। मनैनु बभ्रूणामह ꣳ शतं धामानि सप्त च ॥

हिरण्यगर्भ इति पञ्चरत्नानि

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽ

आसीत्। सदाधार पृथिवीं द्यामुते माङ्कस्मै देवाय हविषा विधेम ॥

याः फलिनीरिति फलानि–

ॐ याः फलानीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः। बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्व ꣳ हसः ।

यवोसीति यवान्–

ॐ यवोसि यवयास्मद्द्वेषो यवयारातीर्दिवेत्वान्तरिक्षाय त्वा पृथिव्यै त्वा शुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥

गन्धद्वारामिति गन्धम्–

ॐ गन्धद्वारा दुराधर्षां नित्यपुष्टां करीषिणीम्।
ईश्वरीं सर्वभूतानां तामिहोपव्हये श्रियम् ॥

काण्डात्काण्डादिति दूर्वाः–

ॐ काण्डात् काण्डात्प्ररोहन्ती परुषः परुषस्परि।
एवानो दूर्वे प्रतनु सहस्रेण शतेन च।

स्योनापृथिवीति सप्तमृदः–

ॐ स्योना पृथिवि नो भवा नृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः ।

अश्वत्थेव इति पञ्चपल्लवैस्तन्मुखमाच्छाद्य–

ॐ अश्वत्थेवो निषदनं पर्णेवो वसतिष्कृता। गोभाजऽइत्किलासथ यत्सनवथ पूरुषम् ॥

बृहस्पत इति वस्त्रयुग्मेन कलशं वेष्टयेत्--

बृहस्पतेऽअति यदर्योऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु ।
यद्दीदयच्छ वसऽऋतप्प्रजात तदस्मासुद्रविणं धेहि चित्रम् ॥
उपयामगृहीतोसि बृहस्पतयेत्वैषते योनिर्वृहस्पतये त्वा ।

अम्बे अम्बिक इति आम्रपल्लवादिभिस्तन्मुखमाच्छादयेत्--

ॐ अम्बेऽअम्बिकेम्बालिके न मानयति कश्चन ।
ससस्त्यश्वकः सुभद्रिकाङ्काम्पीलवासिनीम् ।

ततः तत्त्वयामीति वरुणमावाह्य पूजयेत्–

ॐ तत्त्वा यामि ब्रम्हणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोद्ध्युरुश ꣳ समानऽआयुः प्रमोषी ॥

तत्रैव सर्वे समुद्रा इति तीर्थान्यावाहयेत्–

ॐ सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ।
आयान्तु यजमानस्य दुरितक्षयकारकाः ।

ततः कलशं स्पृष्ट्वाभिमन्त्रयेत्--

ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽप्यथर्वणः ॥
अंगैश्च सहिता सर्वे कलशं तु समाश्रिताः ।

ततः कलशं प्रार्थयेत्–

ॐ देवदानवसंवादे मथ्यमाने महोदधौ ।
उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥

त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ।
त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ॥
त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ।
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥

॥ इति ॥

## (ङ) गणेशपूजा

### परिचय

"श्रेयांसि बहुविघ्नानि" अर्थात् शुभ कार्यमा धेरै विघ्न आउँछन् । मङ्गलस्वरूप गणेशको पूजा गरे सबै विघ्न शान्त हुन्छन् । शास्त्रको भनाइ पनि यही छ व्यवहारमा पनि यस्तै देखिन्छ । यसकारण गणेशको पूजा गरेर कर्मको प्रारम्भ गरिन्छ ।

पूर्वसंकल्पमुच्चार्य, मम (अमुक) कर्म निर्विघ्नपरिसमाप्त्यर्थं यथा संपादितोपचारैगर्णपतिपूजनमहं करिष्ये इति संकल्प्य गणानान्त्वेति गणेशमावाहयेत्--

**ॐ गणानान्त्वागणपति ꣳ हवामहे प्रियाणान्त्वा प्रियपति ꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसोमम । आहमजा निगब्भंधमा त्वमजा सिगब्भंधम् ॥**

ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहितसाङ्गसायुधसवाहनसपरिवार श्रीमन् महागणाधिपते ? इहागच्छ इहतिष्ठ यावत्पूजा करोमि तावत्त्वं सुस्थिरो भव । इत्यावाहय-- ॐ नमः सिद्धिबुद्धिसहितायसाङ्गायसायुधायसवाहनाय सपरिवाराय श्रीमते महागणाधिपतये– इदमासनम्, पाद्यम्, अर्घ्यम्, आचनीयम्, स्नानीयम्, पुनराचमनीयम्, वस्त्रम्,यज्ञोपवीतम्, चन्दनम्, अक्षतान्, पुष्पाणि, धूपम्,

दीपम्, नैवेद्यम्, पूगीफलम्, ताम्बूलम्, फलम्, दक्षिणाम्, पादवन्दनम्, प्रदक्षिणाम् समर्पयामि । इति संपूज्य हस्ते फलादिकमादाय स्तुतिं कुर्यात्–

ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्य रक्षक ।
भक्तानामभयंकर्ता त्राता भव भवार्णवात् ।।
द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो ।।
वरदस्त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ।
अनेन फलदानेन सफलोऽस्तु सदा मम ।।

इति फलं समर्पयेत् । ततः प्रार्थना--

ॐ विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ।।
अविरलमदजलनिवहं भ्रमरकुलानेकसेवितकपोलम् ।
अभिमतफलदातारं कामेशं गणपतिं वन्दे ।।
लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ।। इति ।।

## (च) रक्षाबन्धनपूजा*

### परिचय

रक्षाबन्धनका निमित्त त्रिसूत्री धागो र ११ एकादशग्रन्थि ११ गाँठो पारेको धागोलाई पहेंलोले रंगाई जौ, दूबो, सस्यूँ, चन्दन, गोबर, दही समेत ताम्रपात्रमा राखेर नारायण कवचको पाठ गरिन्छ र रक्षादेवीको पूजा गरिन्छ । यसरी पूजा गरेको रक्षासूत्र कर्म समाप्ति भएपछि यजमानको हातमा बाँधिन्छ । यसबाट यजमानको ठूलो कल्याण हुन्छ । भूतप्रेतादिले छुन सक्तैनन् ।

यवदूर्वासर्षपचन्दनगोमयदधिसहिता रक्षा ताम्रपात्रे निधाय स्पृशन्नारायण कवचं पठेत्–

*एकादशावृत्तमेकादशग्रन्थियुतं (रुद्रग्रन्थि) सूत्रं च सहैव निधाय पूजनम् ।

ॐ पूर्वे रक्षतु गोविन्द आग्नेय्यां धरणीधरः ।
याम्यां रक्षतु वाराहो नारसिंहस्तु नैऋते ॥
वारुण्यां केशवो रक्षेद्वायव्यां मधुसूदनः ।
उत्तरे श्रीधरो रक्षेदैशान्यान्तु गदाधरः ॥
ऊर्ध्वं गोवर्धनो रक्षेदधस्तात्तु महीधरः ।
एवं दशदिशो रक्षेद्वासुदेवो जनार्दनः ।

ॐ रक्षोहणं बलगहनं वैष्णवीमिदमहन्तं बलगमुत्किरामि यम्मेनिष्ट्यो यममात्यो निचखानेदमहन्तं बलगमुत्किरामि यम्मे समानो यमसमानो निचखानेदमहन्तं बलगमुत्किरामि यम्मे सबन्धुर्यमसबन्धुर्निचखानेदमहन्तं बलगमुत्किरामि यम्मे सजातो यमसजातो निचखानोत्कृत्याङ्किरामि ॥ ॐ स्वराडसि सपत्नहा सत्रराडस्य भिमातिहा जनराडसि रक्षोहा सर्वराडस्य मित्रहा ॥ ॐ रक्षोहणो वो बलगहनः प्रोक्षामि वैष्णवान्रक्षोहणो वो बलगहनोवनयामि वैष्णवान्रक्षोहणो वो बलगहनोवस्तृणामि वैष्णवान्रक्षोहणौ वां बलगहनाऽउपदधामि वैष्णवी रक्षोहणौ वां बलगहनौ पर्य्यूहामि वैष्णवी वैष्णवमसि वैष्णवास्थ ॥ ॐ सप्तऽऋषयः प्रतिहिताः शरीरे सप्त रक्षन्ति सदमप्रमादम् । सप्तापः स्वपतो लोकमीयुस्तत्र जागृतोऽ अस्वप्नजौ सत्रसदौ च देवौ ॥ ॐ त्वं यविष्ठ दाशुषोः नृः पाहि श्रृणुधीगिरः । रक्षा तोकमुत त्मना ॥

॥ इति ॥

## ततः कलशस्कन्धप्रदेशे

गणपत्यादि पञ्चायतनेभ्यो नमः। विनायकादि पञ्चलोकपालेभ्यो नमः। सूर्यादि नवग्रहेभ्यो नमः। ईश्वराद्यधिदेवेभ्यो नमः। अग्न्यादि प्रत्यधिदेवेभ्यो नमः। इन्द्रादि दशदिक्पालेभ्यो नमः। ध्रुवाद्यष्टवसुभ्यो नमः। धात्रादि द्वादशादित्येभ्यो नमः। बीरभद्राद्येकादशरुद्रेभ्यो नमः। गौर्यादि षोडशमातृभ्यो नमः। आवहादि सप्त-मरुद्भ्यो नमः॥ विनायक ब्रह्माविणुरुद्रार्कवनस्पतिभ्यो नमः। इति नाममन्त्रेण यथासम्पादितपाद्यादिधूपदीपनैवद्यान्तैरुपचारैः पूजयेत्।

ततः प्रार्थयेत्

सूर्यः शौर्यमथेन्दुरिन्द्रपदवीं सन्मङ्गलं मङ्गलः।
सद्बुद्धिं च बुधो गुरुश्च गुरुतां शुक्रः सुखं शं शनिः।
राहुर्बाहुबलं करोतु सततं केतुः कुलस्योन्नतिं।
नित्यं प्रीतिकरा भवन्तु मम ते सर्वेऽनुकूला ग्रहाः॥ इति॥

## (छ) प्रधान देवतापूजा

### (शिवस्य पञ्चामृतस्नानम्)

(शिवको पञ्चामृतस्नान)

## आदौ ध्यानम्

तत्प्रकारो यथा–

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसम्।
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चववत्रं त्रिनेत्रम्॥

## आवाहनम्

एह्येहि गौरीश पिनाकपाणे शशाङ्कमौले वृषभाधिरूढ।
देवाधिदेवेश महेश नित्यं गृहाण पूजां भगवन् नमस्ते॥

ॐ नमस्ते रुद्र मन्यवऽउतोतऽइषवे नमः । बाहुभ्यामुत ते नमः ॥

## आसनम्

ॐ या ते रुद्र शिवा तनूरघोरा पापकाशिनी । तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥

रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम् ।
आसनं च मया दत्तं गृहाण परमेश्वर ॥

## पाद्यम्

ॐ यामिषुङ्गिरिशन्त हस्ते विभर्ष्यस्तवे । शिवाङ्गिरित्रताङ्कुरु मा हि ँ सीः पुरुषञ्जगत् ॥

उष्णोदकं निर्मलञ्च सर्वसौगन्ध्यसंयुतम् ।
पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥

## अर्घ्यम्

ॐ शिवेन वचसा त्वा गिरिसाच्छा वदामसि । यथा नः सर्वमिज्जगद यक्ष्म ँ सुमनाऽअसत् ॥

अर्घ्यं गृहाण देवेश गन्धपुष्पाक्षतैर्युतम् ।
करुणाकर मे देव प्रसन्नो भव शंकर ॥

## आचमनीयम्

ॐ अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् । अहीँश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योधराचीः परासुव ॥

सर्वतीर्थसमायुक्तं सुगन्धिविमलं जलम् ।
आचम्यतां मया दत्तं चन्द्रशेखर शंकर ॥

## स्नानीयम्

ॐ असौ यस्ताम्रोऽअरुणऽउत बभ्रुः सुमङ्गलः। ये चैन ्ँ रुद्रा अभितो दिक्षु श्रिताः सहस्रशो वैषा ्ँ हेडऽईमहे ॥

गङ्गा सरस्वती रेवा पयोष्णी नर्मदाजलैः।
स्नापितोऽसि मया देव ततः शान्ति कुरुष्व मे ॥

## पञ्चामृतस्नानम्

तत्रादौ क्षीरस्नानम्

### ऊर्ध्ववक्त्रध्यानम्

ॐ व्यक्ताव्यक्तनिरूपितञ्च परमंषट्त्रिंशतत्वादिकं
तस्मादुत्तरमध्यमाक्षरमितिध्येयं सदा योगिभिः ।
ओंकारादिसमस्तमन्त्रजनितं सूक्ष्मादिसूक्ष्मं परं ।
वन्दे पञ्चममीश्वरस्य वदनं खव्यापितेजोमयम् ॥

इति ध्यात्वा

ॐ आप्यायस्वेति गौतम ऋषिः पयोदेवता गायत्री छन्दः ऊर्ध्ववक्त्रे ईशानाय क्षीरस्नाने विनियोगः ।

ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम् । भवावाजस्य सङ्गथे ॥

गोक्षीरधाम देवेश गोक्षीरेण मया कृतम् ।
स्नपनं देवदेवेश गृहाण परमेश्वरः ।

शुद्धोदकस्नानम्

ॐ आपो अस्मान् मातरः शुन्धयन्तु घृतेन नौ घृतप्वः पुनन्तु । विश्व ँ हि रिप्रं प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूत एभि । दीक्षातपसोस्तनूरसि तां त्वा शिवाꣳशग्मां परिदधे भद्रं वर्णं पुष्यन् ॥

ततः–

ॐ भूर्भुवः स्वः तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नोरुद्रः प्रचोदयात् ॥

ॐ ईशानाय नमः , इति मन्त्रेण गन्धपुष्पादिभि पूजयेत् ।
(एवं सर्वत्र)

दधिस्नानम् तत्र पूर्ववक्त्रध्यानम्

ॐ संवर्ताग्नितडित्प्रदीप्तकनकैर्यस्याब्धितेजोऽरुणं
गम्भीरध्वनिसामवेदनिरतं ताम्राधरं सुन्दरम् ।
अर्धेन्दुद्युतिलोलपिङ्गलजटाभारप्रवर्तोत्तरं
वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वं मुखं शूलिनः ॥

इति ध्यात्वा

ॐ दधिक्राव्ण इति वामदेवऋषिर्दधिदेवता अनुष्टुप्छन्द पूर्ववक्त्रे तत्पुरुषाय दधि स्नाने विनियोगः ।

ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः । सुरभिनो मुखाकरत्प्रणऽ आयूꣳषि तारिषत् ।

दध्नाचैव महादेव स्पपनं क्रियते मया ।
गृहाणैव मया दत्तं सुप्रसन्नो भवाद्य वै ॥

पुनः ॐ तत्पुरुषाय नमः, इति पूर्ववत् गन्धादिभिः संपूजयेत् ।

## घृतस्नानम् तत्र पश्चिमवक्त्रध्यानम्

ॐ प्रालेयाचलकुन्दमिन्दुधवलं गोक्षीर फेनप्रभं
भस्माभ्यङ्गमनङ्गदेहदहनं ज्वालावलिर्लोचनम् ।
ब्रह्माविष्णुमरुद्गणार्चितपदं ऋग्वेदनादोऽ द्वयं
वन्देऽहं सकलं कलङ्करहितं स्थाणोर्मुखं पश्चिमम् ।

इति ध्यात्वा

ॐ घृतं मिमिक्ष इति गृत्समद ऋषिः घृतो देवता त्रिष्टुप्छन्द पश्चिमवक्त्रे सद्योजाताय घृतस्नाने विनियोगः ।

**ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृतेश्रितो घृतम्वस्य धाम । अनुष्वधमावहमादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥**

सर्पिषा च महादेव स्नपनं क्रियते मया ।
गृहाण श्रद्धया दत्तं तव प्रीत्यर्थमेव च ॥

## शुद्धोदकस्नानम्

**ॐ आपोऽअस्मान्० ।**

पुनः 'ॐ सद्योजाताय नमः, इति पूर्ववत् पूजयेत्

## मधुस्नानम्, तत्र दक्षिणवक्त्रध्यानम्

ॐ कालाभ्रभ्रमराञ्जनद्युतिनिभं संवर्तपिङ्गेक्षणं
कर्णाभूषणभोगमस्तकमणिं प्रोद्भिन्नदंष्ट्राङ्कुरम् ।
सर्पप्रेतकपालपङ्क्तिसकलं व्यापाण्डुगण्डस्थलं
वन्दे दक्षिणमीश्वरस्य वदनं चाथर्वनादोऽद्वयस् ।

इति ध्यात्वा

ॐ मधुवाताऽऋतायते मधु क्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः ॥ मधु नक्तमुतोषसो मधुमत्पार्थिवꣳरजः। मधु द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँऽअस्तु सूर्यः। माध्वीर्गावो भवन्तु नः ॥

तरुपुष्पसमुद्‌भूतं सुस्वादुमधुरं मधु।
तेज पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम्।

## शुद्धोदकस्नानम्

ॐ आपोऽअस्मान्०।

पुनः अघोराय नमः इति पूर्ववत् पूजयेत्

## शर्करास्नानम् तत्र उत्तरवक्त्रध्यानम्

ॐ गौरं कुङ्कुमपङ्किलं सुतिलकमापाण्डुगण्डस्थलं
भ्रूमृत् क्षिप्तकटाक्षलक्षणलसत्सन्तप्तकर्णोत्पलम्।
स्निग्धं विम्बफलाधरं प्रहसितं नीलालकालङ्कृतं
वन्दे वाजुषवन्दनाद सहितं वक्त्रं हरस्योत्तरम् ॥

इति ध्यात्वा

ॐ अपा ꣳ रसमित्यस्य इन्द्रबृहस्पतिऋषिरनुष्टुप्छन्दः सदाशिवो देवता उत्तरवक्त्रे वामदेवाय शर्करास्नाने विनियोगः।

ॐ अपाꣳरसमुद्वयसꣳसूर्ये सन्तꣳसमाहितम्। अपाꣳ रसस्य यो रसस्तं वो गृण्हाम्युत्तममुपयामगृहीतोसीन्द्राय त्वा जुष्टङ्गृण्हाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका ।
मलापहारिणी दिव्या स्नानाय प्रतिगृह्यताम् ।

## शुद्धोदकस्नानम्

ॐ आपोऽअस्मान्० ।

## गन्धोदकस्नानम्

मलयाचलसम्भूतं चन्दनागरुवासितम् ।
सलिलं देवदेवेश स्नानार्थं प्रतिगृह्यताम् ॥
ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥
नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम् ।
उद्वर्तनम् मयादत्तं गृहाण शशिशेखर ॥

ॐ अꣳ शुनाते अꣳ शुः पृच्यताम्परुषापरुः ।
गन्धस्ते सोममवतु मदाय रसोऽअच्युतः ॥

## पुनः शुद्धोदकस्नानम्

ॐ आपोऽअमाऽन्० ।

# (ज) ततो नाममन्त्रेण संक्षिप्तपूजा

(नाममन्त्रद्वारा संक्षिप्तपूजा)

"ॐ साम्बसदाशिवाय नमः" ।
इति मन्त्रेण गन्धाक्षतबिल्वपत्रधूपदीपनैवेद्यानि समर्प्य–

"ॐ गणानान्त्वा" इत्यादिभिर्मन्त्रैः संकल्पितावृत्तिभीरुद्राध्यायं पठन् जलधारया (दुग्धादिधारया वा) अभिषेकं कुर्यात् ।1

१– स्नपनद्रव्यभेदेन फल भेदाः–
जलेन वृष्टिमाप्नोति व्याधिशान्त्यै कुशोदकैः ।
दध्ना च पशुकामाय श्रिया इक्षुरसेन च ।।
मध्वाज्येन धनार्थी स्यान्मुमुक्षुस्तीर्थवारिणा ।
पुत्रार्थी पुत्रमाप्नोति पयसां चाभिषेचनात् ।।
वन्ध्या वा काकवन्ध्या वा मृतवत्सा च याङ्गना ।
सद्यः पुत्रमवाप्नोति पयसां चाभिषेचनात् ।।
अन्यच्च–
ज्वरप्रकोपशान्त्यर्थं जलधारा शिवप्रिया ।
घृतधारा शिवे कार्या यावन्मन्त्रसहस्रकम् ।।
तदा वंशस्य विस्तारो जायते नात्रसंशयः ।
प्रमेहरोगशान्त्यर्थं प्राप्नुयान्मानसेप्सितम् ।।
केवलं दुग्धधारा च तदा कार्या विशेषतः ।
शर्करामिश्रिता तत्र यदा बुद्धिर्जडा भवेत् ।।
श्रेष्ठा बुद्धिर्भवेत्तस्य कृपया शंकरस्य च ।
सार्षपेणैव तैलेन शत्रुनाशो भवेदिह ।।
मधुना यक्ष्मराजोऽपि गच्छेद्वै शिवपूजनात् ।
पापक्षयार्थी मधुना निर्व्याधिः सर्पिषा तथा ।।
जीवनार्थी तु पयसा श्रीकामीक्षुरसेन वै ।
पुत्रार्थी शर्करायास्तु रसेनार्चेच्छिवं तथा ।।
महालिङ्गाभिषेकेण सुप्रीतः शंकरो मुदा ।
अन्यदपि (आवृत्तिभेदेन फलविशेषः)
बालग्रहोपशान्त्यर्थमेकावृत्तिमुदीरयेत् ।
उपसर्गोपिशान्त्यर्थं त्रिरावृत्तिः पठेन्नरः ।।
ग्रहोपशान्त्यै कर्तव्या पञ्चावृत्तिर्वरानने ।
महाभये समुत्पन्ने सप्तावृतिमुदीरयेत् ।।
नवावृत्याभवेच्छान्तिर्वाजपेयफलं लभेत् ।
राजवश्ये विभूत्यै च रुद्रावृत्तिमुदीरयेत् ।।
रुद्रैस्त्रिभिः कामसिद्धिर्वैरिहांनिश्च जायते ।

रुद्रैः पञ्चभिः शत्रुश्च तथा स्त्रीवश्यतामियात् ।।
रुद्रैः सप्तभिः सङ्ख्याभिः श्रियमाप्नोति मानवः ।
नवरुद्रैः पुत्रपौत्रधनधान्यसमन्वितः ।।
राज भीतिविनाशाय वैरस्योच्चाटनाय च ।
धर्मार्थकाममोक्षाणां साधनाय ततः परम् ।।
अल्पमृत्युविनाशाय तथारोग्ययशः श्रियै ।
राजवृद्धिप्रदेयाय (?) महारुद्रैक सङ्ख्यया ।।
त्रिभिश्चैव महारौद्रैरसाध्यसाधनाय च ।
पञ्चभिश्च महारुद्रैराज्यलाभः प्रसाध्यते ।।
सप्तभिश्च महारुद्रैः सप्तलोकः प्रसाध्यते ।
नवभिश्च महारुद्रैः पुनर्जन्म नविद्यते ।।
अतिरुद्रैकसङ्ख्येन देवत्वं प्राप्नुयान्तरः ।
डाकिन्यादिभये प्राप्ते एकावृत्ति जपेन्नरः ।।
भूतप्रेतपिशाचानां भये च गुणवृत्तिभिः ।
ग्रहदोषदशायाश्च पञ्चावृत्ति न संशयः ।।
ज्वरातिसारदोषादौ वातपित्तकफादिषु ।
सर्वरोगोपशान्त्यर्थं सप्तावृत्ति पठेन्नरः ।।
असाध्यरोगनाशाय मनोऽभीप्सितकर्मणि ।
अल्पमृत्युविनाशाय तथारोग्याय वै नमः ।।
इति ।

(अशुद्धिस्थले संशोध्य पठन्तु विद्वांसः)

खण्ड ८ (१)

# रुद्राभिषेकान्तर्गतः

# षडङ्गन्यासः

(रुद्राभिषेक अन्तर्गत षडङ्गन्यासक्रमः)

## (क) रुद्राध्यायस्य प्रथमाध्यायपाठः

## हृदयन्यासः

(गणानान्त्वा इत्यारभ्य सुषारथिरश्वान् ०)

इति रुद्राध्यायस्य दशमन्त्रात्मक प्रथमाध्यायं पठित्वा– "ॐ हृदयाय नमः" इति हृदयन्यासं कुर्यात् ।

## (ख) द्वितीयाध्यायस्य षोडशमन्त्रपाठः

## शिरोन्यासः

'सहस्रशीर्षा पुरुषः०' इत्यारभ्य 'यज्ञेन यज्ञम् ०' इत्यन्तान् द्वितीयाध्यायस्य षोडश मन्त्रान् पठित्वा–"ॐ शिरसे स्वाहा" इति शिरोन्यासं कुर्यात् ।

## (ग) द्वितीयाध्यायस्य अवशिष्टमन्त्रपाठः

## शिखान्यासः

'अद्‌भ्यः सम्भृतः०' इत्यारभ्य श्रीश्चते०, इति षण्मन्त्रान् पठित्वा "ॐ शिखायै वषट्" इति शिखान्यासः ।

## (घ) तृतीयाध्यायस्य पाठः

# कवचन्यासः

आशुः शिशानः० इत्यारभ्य मर्माणिते० इति सप्तदश मन्त्रात्मकं तृतीयाध्यायं पठित्वा ।"ॐ कवचाय हुम् । इति कवचन्यासं कुर्यात् ।

## (ङ) चतुर्थाध्यायस्य पाठः

# नेत्रन्यासः

विभ्राड् बृहत्० "इत्यारभ्य आकृष्णेन० इति सप्तदश मन्त्रात्मकं चतुर्थाध्यायं पठित्वा "ॐ नेत्रत्रयाय वौषट्" इति नेत्रन्यासं कुर्यात् ।

## (च) पञ्चमाध्यायस्य षोडशमन्त्रपाठः

# अस्त्रन्यासः

नमस्ते० इत्यारभ्य मानस्तोके० इति षोडश मन्त्रान् पठित्वा ॐ अस्त्राय फट्" इति अस्त्रन्यासं कुर्यात् ।

॥ इति षडङ्गन्यासक्रमः ॥

खण्ड–८ (२)

# अथ रुद्राभिषेकः

## (तत्र शतरुद्रीयमन्त्रपाठक्रमः)

(क) पञ्चमाध्यायस्य प्रथममन्त्रतः समग्राध्यायपाठः, पुनः (नमस्ते०) षोडशमन्त्र पाठः । समग्रषष्ठाध्याय पाठः ० (एषते, इति द्वौ मन्त्रौ (नमस्ते०) इति द्वौ मन्त्रौ (नतम्विदाथ०) इति द्वौ मन्त्रौ ('मीढुष्टम') इति चत्वारो मन्त्राः । 'वय ꣳ सोम' इति अष्टौ मन्त्राणां पाठः ॥

॥ इति शतरुद्रीय मन्त्रपाठक्रमः ॥

## ॥ अथ शान्तिपाठक्रमः ॥

(ख) उग्रश्च०, अग्नि ꣳ हृदयेन० उग्रँल्लोहितेन०, वाजश्च मे०, प्राणश्च मे०, इमा मे, विश्वतश्चक्षुः, इत्येकैकं मन्त्रं पठित्वा–"ऋचं वाचम्०" इत्यस्य समग्राध्यायपाठः, अन्ते च– ॐ स्वस्ति न इन्द्रः । विश्वानि देव० । इत्येतेषां मन्त्राणां पाठः । इति शान्ति पाठक्रमः ।

श्रीगणेशाय नमः ॥ हरिः ॐ गुणाना
न्त्वागुणपतिꣳहवामहेप्रियाणान्त्वाप्प्रियपतिꣳ
हवामहेनिधीनान्त्वा निधिपतिꣳहवामहेवसो
मम ॥ आहमजानि गर्ब्भधमात्वमजासिगर्ब्भ
धम् ॥ १ ॥ गायत्रीत्रिष्टुप्जगत्यनुष्टुप्पङ्
क्त्यासह ॥ बृहत्युष्णिहाककुप्सूचीभिः शम्य
न्तुत्वा ॥ २ ॥ द्विपदायाश्चतुष्पदास्त्रिपदायाश्च
षट्पदाꣳविच्छन्दायाश्चसच्छन्दाꣳसूचीभिः
शम्यन्तुत्वा ॥ ३ ॥ सहस्तोमाꣳसहछन्दसऽआ
वृतः सहप्प्रमाऽऋषयꣳसप्तदैव्याः पूर्वेषाम्प
न्थामनुदृश्य धीराअन्वालेभिरे रथ्योनरश्मी
न् ॥ ४ ॥ यज्जाग्रतो दूरमुदैति दैवन्तदुसुप्तस्य
तथैवैति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेक
न्तन्मेमनः शिवसङ्कल्पमस्तु ॥ ५ ॥ येन

कर्म्माण्युपसो मनीषिणोयज्ञे कृण्वन्ति व्विद
थेषु धीराः ॥ यदपूर्व्वं यक्षमन्तः प्रजानान्तन्मे
मनः शिवसङ्कल्पमस्तु ॥६॥ यत्प्रज्ञानमुतचेतो
धृतिश्च यज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्म्मा
न्नऽऋते किञ्चनकर्म्म क्रियते तन्मे मनः शिव
सङ्कल्पमस्तु ॥ ७ ॥ येनेदम्भूतम्भुवनम्भ
विष्यत्परिगृहीतममृतेनसर्व्वम् ॥ येन यज्ञस्ता
यते सप्तहोता तन्मेमनः शिवसङ्कल्पमस्तु॥८॥
यस्मिन्नृचः सामयजूꣳषियस्मिन्प्रतिष्ठिता
रथनाभाविवाराः ॥ यस्मिँश्चित्तꣳसर्व्वमोतम्प्र
जानान्तन्मेमनः शिवसङ्कल्पमस्तु ॥९॥ सुषा
रथिरश्वानिवयन्न्मनुष्यान्नेनीयतेभीशुभिर्व्वा
जिनऽइव॥हृत्प्रतिष्ठँयदजिरञ्जविष्ठन्तन्न्मे
मनः शिवसङ्कल्पमस्तु ॥ १० ॥ इति श्रीरुद्रे

प्रथमोऽध्यायः ॥ १ ॥ हरिः ॐ ॥ सहस्रशीर्षा
पुरुषः सहस्राक्षः सहस्रपात् ॥ स भूमिं सर्वत
स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषऽएवेदं
सर्वं यद्भूतं यच्च भाव्यम् ॥ उतामृतत्वस्ये
शानो यदन्नेनातिरोहति ॥२॥ एतावानस्य महि
मातो ज्ज्यायाँश्च पूरुषः ॥ पादोऽस्य विश्वा भूतानि
त्रिपादस्यामृतं दिवि ॥३॥ त्रिपादूर्द्ध्वऽउदैत्पुरु
षः पादोऽस्येहाभवत्पुनः ॥ ततो विष्वङ्व्यक्रा
मत्साशनानशनेऽअभि ॥४॥ ततो विराडजाय
त विराजोऽअधि पूरुषः ॥ स जातोऽअत्यरिच्य
त पश्चाद्भूमिमथो पुरः ॥५॥ तस्माद्यज्ञात्सर्वहु
तः सम्भृतं पृषदाज्यम् ॥ पशूँस्ताँश्चक्रे वाय
व्यानारण्यान्ग्राम्याश्च ये ॥ ६ ॥ तस्माद्यज्ञा
त्सर्वहुतऽऋचः सामानि जज्ञिरे ॥ छन्दांसि

जज्ञिरेतस्म्माद्यजुस्तस्म्मादजायत ॥ ७ ॥
तस्म्मादश्वाऽअजायन्तयेकेचोभयादतः॥गा
वोहजज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजावयः
॥८॥तँयज्ञम्बर्हिषिप्प्रौक्षन्पुरुषञ्जातमग्ग्रतः॥
तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये ॥ ९ ॥
यत्पुरुषंव्व्यदधुःकतिधाव्व्यकल्पयन् ॥ मुख
ङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽउच्च्येते
॥१०॥ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः
कृतःऊरूतदस्ययद्वैश्यःपद्भ्याᳬशूद्रोऽअ
जायत ॥ ११ ॥ चन्द्रमामनसोजातश्चक्षोः
सूर्य्योऽअजायत ॥ श्रोत्राद्वायुश्चप्प्राणश्च
मुखादग्निरजायत ॥ १२ ॥ नाभ्याऽआसी
दन्तरिक्षꣳशीर्ष्णोद्यौःसमवर्त्तत ॥ पद्भ्या
म्भूमिर्दिशःश्रोत्रात्तथालोकाँ२ऽअकल्पयन्

॥ १३ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥
वसन्तोऽस्यासीदाज्यङ्ग्रीष्मऽइध्मःशरद्धु
विः ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिःसप्तस
मिधःकृताः ॥ देवायद्यज्ञन्तन्वानाऽअबध्न
न्पुरुषम्पशुम् ॥ १५ ॥ यज्ञेनयज्ञमयजन्तदे
वास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकं
म्महिमानःसचन्तयत्रपूर्वेसाध्याःसन्तिदे
वाः ॥ १६ ॥ अद्भ्यःसम्भृतःपृथिव्यैरसाच्च
विश्वकर्म्मणःसमवर्त्तताग्रे ॥ तस्यत्वष्टाविद
धद्रूपमेतितन्मर्त्यस्यदेवत्वमाजानमग्रे ॥ १७ ॥
वेदाहमेतम्पुरुषम्महान्तमादित्यवर्ण्णन्तमसः
परस्तात् ॥ तमेवविदित्वातिमृत्युमेतिनान्यः
पन्थाविद्यतेयनाय ॥ १८ ॥ प्रजापतिश्चरतिग
र्भेऽअन्तरजायमानोबहुधाविजायते ॥ तस्य

योनिम्परिपश्यन्तिधीरास्तस्मिन्हतस्त्थुर्ब्भुव
नानिविश्वा ॥ १९ ॥ योदेवेब्भ्यऽआतपतियो
देवानाम्पुरोहितः ॥ पूर्व्वोयोदेवेब्भ्योजातोनमो
रुचायब्ब्राह्मये॥२०॥रुचम्ब्राह्ममज्जनयन्तो
देवाऽअग्ग्रेतदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोविद्या
त्तस्यदेवाऽअसन्वशे ॥ २१ ॥ श्रीश्चतेलक्ष्मी
श्चपत्क्न्यावहोरात्त्रेपार्श्वेनक्षत्राणिरूपमश्वि
नौव्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्व्व
लोकम्मऽइषाण ॥ २२ ॥ इति श्रीरुद्रे
द्वितीयोऽध्यायः ॥२॥ हरिः ओं आशुश्शिशा
नोव्वृषभोनभीमोघनाघन श्क्षोभणश्चर्षणी
नाम ॥ सङ्क्रन्दनोनिमिषऽएकवीरश्शतᳬ
सेनाऽअजयत्साकमिन्द्रः ॥ १ ॥ सङ्क्र
न्दनेनानिमिषेणजिष्णुनायुत्कारेणदुश्च्यव

नेनधृष्णुना ॥ तदिन्द्रेणजयततत्सहध्वँय्यु
धोनरऽइषुहस्तेनव्वृष्णा ॥२॥ सऽइषुहस्तैःस
निषङ्गिभिर्व्वशीसꣳस्रष्टासयुधऽइन्द्रोगणेन ॥
सꣳसृष्टजित्सोमपाबाहुशर्द्ध्युग्ग्रधन्वाप्प्रति
हिताभिरस्ता ॥ ३ ॥ बृहस्पतेपरिदीयारथेनर
क्षोहामित्राँ२ऽअपबाधमानः ॥ प्रभञ्जन्त्से
नाः प्रमृणोयुधाजयन्नस्माकमेद्ध्यविता र
थानाम् ॥ ४ ॥ बलविज्ञायस्थविरःप्प्रवीरः
सहस्वान्वाजीसहमानऽउग्ग्रः ॥ अभिवीरोऽ
अभिसत्त्वासहोजाजैत्रमिन्द्ररथमातिष्ठगोवि
त् ॥ ५ ॥ गोत्रभिदङ्गोविदंव्वज्रबाहुञ्जयन्तम
ज्ज्मप्प्रमृणन्तमोजसा ॥ इमꣳसजाताऽअनुवी
रयद्ध्वमिन्द्रꣳसखायोऽअनुसꣳरभद्ध्वम् ॥६॥
अभिगोत्राणिसहसागाहमानोदयोवीरः शत

मन्न्युरिन्द्र÷ ॥ दुश्च्यवनःपृतनाषाडयुद्ध्यो
स्म्माकꣳसेनाऽअवतुप्प्रयुत्त्सु॥७॥इन्द्रऽआसा
न्नेताबृहस्प्पतिर्द्दक्षिणायज्ञःपुरऽएतुसोम÷॥
देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोय
न्त्वग्ग्रम्॥८॥ इन्द्रस्यवृष्णोव्वरुणस्यराज्ञऽ
आदित्त्यानाम्मरुताꣳशर्द्धऽउग्ग्रम् ॥ महाम
नसाम्भुवनच्च्यवानाङ्घोषोदेवानाञ्जयतामुद
स्त्थात् ॥९॥ उद्धर्षयमघवन्नायुधान्युत्सत्त्व
नाम्मामकानाम्मनाꣳसि॥ उद्वृत्रहन्वाजिनां
व्वाजिनान्युद्रथानाञ्जयतांय्यन्तुघोषा÷॥१०॥
अस्म्माकमिन्द्रः समृतेषुद्ध्वजेष्ष्वस्म्माकं
य्याऽइषवस्ताजयन्तु॥ अस्म्माकंव्वीराऽउत्तरे
भवन्त्वस्माँ २ऽउदेवाऽअवताहवेषु ॥ ११ ॥
अमीषाञ्चित्तम्प्रतिलोभयन्ती गृहाणाङ्गान्य

ष्वेपरेहि ॥ अभिप्रेहिनिर्दहहृत्सुशोकैरन्धे
नामित्रास्तमसासचन्ताम् ॥ १२ ॥ अवसृष्टा
परापतशरव्येब्रह्मसंशिते ॥ गच्छामित्रा
न्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः ॥ १३ ॥
प्रेताजयतानरऽइन्द्रोवःशर्म्मयच्छतु ॥ उग्रा
वः सन्तुबाहवोनाधृष्ष्यायथासथ॥१४॥ असौ
यासेनामरुतः परेषामुभ्यैतिनऽओजसास्प
र्द्धमाना ॥ ताङ्गूहततमसापव्रतेनयथामीऽअ
न्योऽअन्यन्नजानन् ॥ १५ ॥ यत्रबाणाःसम्प
तन्तिकुमाराविशिखाऽइव ॥ तन्नऽइन्द्रोबृह
स्पतिरदितिःशर्म्मयच्छतुविश्वाहाशर्म्मय
च्छतु ॥ १६ ॥ मर्म्माणितेवर्म्मणाच्छादया
मिसोमस्त्वाराजामृतेनानुवस्ताम् ॥ उरोर्व्व
रीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु

॥ १७ ॥ इति श्रीरुद्रे तृतीयोऽध्यायः ॥ ३ ॥
हरिः ॐ व्विभ्भ्राड्बृहत्पिबतुसोम्म्यम्मद्ध्वा
युर्द्दधद्यज्ञपतावविहुतम् ॥ व्वातजूतोयोऽअ
भिरक्षतित्क्मनाप्प्रजाः पुपोषपुरुधाव्विराजति
॥ २ ॥ उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः ॥
दृशेव्विश्श्वायसूर्य्यम् ॥ २ ॥ येनापावकचक्षसा
भुरण्यन्तञ्जनाँ२ऽअनु ॥ त्वंव्वरुणपश्श्यसि
॥ ३ ॥ दैव्व्यावद्ध्वर्य्यूऽआगतꣳरथेनसूर्य्य
त्त्वचा ॥ मद्ध्वायज्ञꣳसमञ्जाथे ॥ तम्प्रत्क्नथाऽ
यंव्वेनश्चित्रन्देवानाम् ॥ ४ ॥ तम्प्रत्क्नथापूर्व्वथा
व्विश्वथेमथाज्ज्येष्ठतातिम्बर्हिषदꣳस्वर्व्विदम्
प्रतीचीनंव्वृजनन्दोहसेधुनिमाशुञ्जयन्तमनुया
सुवर्द्धसे ॥ ५ ॥ अयंव्वेनश्चोदयत्पृश्निगर्ब्भा
ज्ज्योतिर्ज्जरायुरजसोव्विमाने ॥ इममपाꣳसं

ङ्मेसूर्य्यस्याशिशुन्नाविप्पामुतिभीरिहन्ति॥६॥
चित्रन्देवानामुदगादनीकञ्चक्षुम्मित्रस्यव्वरु
णस्याग्नेः ॥ आप्प्राद्यावापृथिवीऽअन्तरिक्षꣳ
सूर्य्यऽआत्मा जगतस्तस्थुषश्च ॥७॥ आनऽ
इडाभिर्व्विदथेसुशस्तिव्विश्वानरꣳ सविता दे
वऽएतु॥ अपियथायुवानोमत्सथानोविश्वञ्जग
दभिपित्वेमनीषा॥८॥ यदद्यकच्चवृत्रहन्नुद
गाऽअभिसूर्य्य॥ सर्व्वन्तदिन्द्रतेवशे॥९॥ तर
णिर्व्विश्वदर्शतोज्ज्योतिष्कृदसिसूर्य्य॥ विश्वमा
भासिरोचनम॥१०॥ तत्सूर्य्यस्यदेवत्त्वन्तन्म
हित्त्वम्मध्यकर्त्तोर्व्विततꣳसञ्जभार ॥ यदेद
युक्तहरितः सधस्त्थादाद्रात्रीव्वासस्तनुतेसि
मस्म्मै॥११॥ तन्मित्रस्यव्वरुणस्याभिचक्षे
सूर्य्योरूपङ्कृणुतेद्द्योरुपस्त्थे॥ अनन्तमन्न्यद्द्रु

शंदस्यपाजं÷कृष्णमुन्यद्धुरितःसम्भरन्ति
॥१२॥ बण्महाँ२ऽअसिसूर्य्यबडादित्त्यमहाँ
२ऽअसि॥ महस्तेसतोमहिमापनस्यतेद्धादेव
महाँ२ऽअसि॥१३॥ बट्सूर्य्यश्रवसामहाँ२
असिसत्रादेवमहाँ२ऽअसि॥ मह्नादेवानाम
सूर्य्यं÷पुरोहितोविभुज्ज्योतिरदाब्भ्यम्॥१४॥
श्रायन्तऽइवसूर्य्यंविश्वेदिन्द्रस्यभक्षत॥ व्वसूं
निजातेजनमानऽओजसाप्रतिभागन्नदीधिम
॥१५॥अद्यादेवाऽउदितासूर्य्यस्यनिरंहसः
पिपृतानिरवद्यात्॥ तन्नोमित्रोवरुणोमामह
न्तामदितिःसिन्धुः÷पृथिवीऽउतद्यौः ॥१६॥
आकृष्णेनरजसावर्त्तमानोनिवेशयन्नमृतम्म
र्त्यञ्च॥ हिरण्ययेनसवितारथेनादेवोयाति
भुवनानिपश्यन्॥१७॥ इति श्रीरुद्रे चतुर्थोऽ

ध्यायः ॥४॥ हरिः ॐ नमस्तेरुद्रमन्यवऽउतोतऽ
इषवेनमः ॥ बाहुभ्यामुततेनमः ॥ १ ॥ याते
रुद्रशिवातनूरघोरापापकाशिनी ॥ तयानस्त
न्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ २ ॥
यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे ॥ शिवा
ङ्गिरित्रताङ्कुरुमाहिंसीःपुरुषञ्जगत् ॥३॥ शि
वेनवचसात्वागिरिशाच्छावदामसि ॥ यथा
नःसर्वमिज्जगदयक्ष्मंसुमनाऽअसत् ॥ ४ ॥
अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् ॥
अहींश्चसर्वाञ्जम्भयन्त्सर्वाश्चयातुधान्योधरा
चीःपरासुव ॥ ५ ॥ असौयस्ताम्रोऽअरुणऽउ
तबभ्रुःसुमङ्गलः ॥ येचैनंरुद्राऽअभितोदि
क्षुश्रिताःसहस्रशोवैषांहेडऽईमहे ॥ ६ ॥
असौयोवसर्पतिनीलग्रीवोविलोहितः ॥ उतै

नंङ्गोपाऽअंदृश्रन्नदृंश्रन्नुदहार्य्युंःसदृष्टोमृंड
यातिनः ॥७॥ नमोस्तुनीलंग्ग्रीवायतहस्राक्षा
यंमीढुषें ॥ अथोयेऽअंस्यसत्त्वांनोहन्तेभ्यो
करन्नमंः ॥ ८ ॥ प्रमुंञ्चधन्न्वंनुस्त्वमुभयो
रात्त्न्योर्ज्ज्याम् ॥ याश्चंतेहस्तऽइषंवःपरा
ताभंगवोव्वप ॥९॥ विज्ज्यन्धनुंःकपर्दिनोव्वि
शंल्ल्योबाणंवाँ२ऽउत ॥ अनेशन्नस्ययाऽइष
वऽआभुरंस्यनिषङ्गधिः ॥ १० ॥ यातेहेतिर्म्मी
ढुष्टमहस्तेबभूवंतेधनुंः ॥ तयास्म्मान्विश्वत
स्त्वमंयक्ष्मयापरिंभुज ॥ ११ ॥ परिंतेधन्न्वंनो
हेतिरस्मान्व्वृणक्तुविश्वतंः ॥ अथोयऽइंषुधि
स्तवारेऽअस्म्मन्निधेहितम् ॥ १२ ॥ अवतत्त्य
धनुष्ट्वꣳसहंस्राक्षशतेषुधे ॥ निशीर्य्यंशल्ल्या
नाम्मुखांशिवोनःसुमनांभव ॥ १३ ॥ नमं

स्तऽआयुधायानाततायधृष्णवे॥ उभाभ्यां
मुततेनमोबाहुभ्यान्तवधन्न्वने॥१४॥मानो
महान्तमुतमानोऽअर्भकम्मानऽउक्षन्तमुत
मानऽउक्षितम्॥ मानोव्वधीःपितरम्मोतमात
रम्मानःप्प्रियास्तन्न्वोरुद्ररीरिषः ॥१५॥
मानस्तोकेतनयेमानऽआयुषिमानोगोषुमा
नोऽअश्वेषुरीरिषः॥ मानोव्वीरान्नुद्रभामिनो
वधीर्हविष्मन्तःसदमित्त्वाहवामहे ॥१६॥
नमोहिरण्यबाहवे । सेनान्येदिशाञ्चपतयेन
मोनमोव्वृक्षेभ्योहरिकेशेभ्यः पशूनाम्पत
येनमोनमः शष्पिञ्जरायत्विषीमतेपथीनाम्प
तयेनमोनमोहरिकेशायोपवीतिनेपुष्टानाम्पत
येनमोनमोबभ्लुशाय ॥१७॥ नमोबभ्लु
शाय व्याधिनेन्नानाम्पतयेनमोनमोभवस्य

हेत्त्यैजगंताम्पतंयेनमोनमोरुद्द्रायातंतायिने
क्षेत्त्राणाम्पतंयेनमं ÷ सूतायाहंन्त्यैव्वनानां
म्पतंयेनमोनमोरोहिताय ॥ १८ ॥ नमो
रोहिताय स्त्थपतंयेव्वृक्षाणाम्पतंयेनमोनमो
भुवन्तयैव्वारिवस्कृतायौषंधीनाम्पतंये नमो
नमोमन्त्रिणेव्वाणिजायकक्षाणाम्पतंयेनमोन
मंऽउच्चैग्घोषायाक्क्रन्दयंतेपत्तीनाम्पतंयेनमोन
मं÷कृत्त्स्नायतयां ॥१९॥ नमं÷कृत्त्स्नायतया
धावंतेसत्त्वंनाम्पतंयेनमोनम ँ सहंमानायनि
व्व्याधिनं ऽ आव्व्याधिनीनाम्पतंये नमोनमो
निषङ्गिणेककुभायंस्तेनानाम्पतंये नमोनमो
निचेरवेंपरिचरायारंण्ण्यानाम्पतंये नमोनमो
व्वंञ्चते ॥२०॥ नमोव्वञ्चंतेपरिव्वञ्चंतेस्तायूना
म्पतंये नमोनमोनिषङ्गिणं ऽ इषुधिमतेतस्क्कंरा

णाम्पतयेनमोनमः सृकायिभ्योजिघांᳪ स
द्भ्योमुष्णताम्पतयेनमोनमो सिमद्भ्योनक्तञ्चरं
द्भ्योव्विकृन्तानाम्पतयेनमः ॥ २१ ॥
नम ऽ उष्णीषिणेगिरिचरायकुलुञ्चानाम्पत
येनमोनमऽइषुमद्भ्योधन्वायिभ्यश्चवोनमो
नमऽआतन्वानेभ्यः प्रतिदधानेभ्यश्च
वोनमोनम ऽ आयच्छद्भ्योस्यद्भ्यश्चवोनमो
नमोविसृजद्भ्यः ॥ २२ ॥ नमोव्विसृजद्भ्यो
व्विध्यद्भ्यश्चवोनमोनमः स्वपद्भ्योजाग्र
द्भ्यश्चवोनमोनमः शयानेभ्यऽआसीनेभ्य
श्चवोनमोनमस्तिष्ठद्भ्योधावद्भ्यश्चवोनमो
नमः सभाभ्यः ॥ २३ ॥ नमः सभाभ्यः
सभापतिभ्यश्चवोनमोनमोऽश्वेभ्योऽश्वपति
भ्यश्चवोनमोनमऽआव्याधिनीभ्योविविद्ध्यं

न्तीभ्यश्चवोनमोनम ऽ उगणाभ्यस्तृꣳहती
भ्यश्चवोनमोनमोगणेभ्यः ॥२४॥ नमोगणे
भ्योगणपतिभ्यश्चवोनमोनमोव्रातेभ्योव्रात
पतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्य
श्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवो
नमोनमःसेनाभ्यः ॥२५॥ नमःसेनाभ्यःसे
नानिभ्यश्चवोनमोनमोरथिभ्योऽअरथेभ्य
श्चवोनमोनमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च
वोनमोनमोमहद्भ्योऽअर्भकेभ्यश्चवोनमोन
मः ॥ २६ ॥ नमस्तक्षभ्योरथकारेभ्यश्च
वोनमोनमः कुलालेभ्यः कर्मारेभ्यश्चवो
नमोनमोनिषादेभ्यः पुञ्जिष्टेभ्यश्चवोनमो
नमः श्वनिभ्योमृगयुभ्यश्चवोनमोनमः
श्वभ्यः ॥ २७ ॥ नमःश्वभ्यःश्वपतिभ्य

श्चवोनमोनमोभवायचरुद्रायचनमःशर्वाय
चपशुपतयेचनमोनीलग्ग्रीवायचशितिकण्ठाय
चनमः कपर्द्दिने ॥ २८ ॥ नमः कपर्द्दिने
चव्युप्तकेशायचनमः सहस्राक्षायचशतध
न्वनेचनमोगिरिशयायचशिपिविष्टायचनमो
मीढुष्टमायचेषुमतेचनमोह्रस्वाय ॥ २९ ॥
नमोह्रस्वायचव्वामनायचनमोबृहतेचव्वर्षी
यसेचनमोव्वृद्धायचसवृधेच नमोग्ग्रयायचप्प्र
थमायचनमऽआशवे ॥ ३० ॥ नमऽआशवे
चाजिरायचनमःशीग्घ्रयायचशीब्भ्यायचन
म ऽ ऊर्म्म्यायचावस्वन्न्यायचनमोनादेयायच
द्वीप्प्यायच ॥ ३१ ॥ नमोज्ज्येष्ठायचकनिष्ठा
यचनमः पूर्व्वजायचापरजायचनमोमद्धयमा
यचापगल्भायचनमोजघन्न्यायचबुध्न्याय

चुनमु॑ऽसोभ्याय ॥ ३२ ॥ नमु॑ऽसोभ्याय
चप्प्रतिसुर्य्यायचुनमोयाम्म्यायचुत्तेम्म्यायच
नमुंश्श्लोक्यायचावसान्न्यायचनमंऽउर्व्वुर्य्या
यचुखल्ल्यायचनमोव्वन्न्याय ॥ ३३ ॥ नमो
व्वन्न्यायचुकत्त्यायचुनमं ÷ श्श्रुवायंचप्प्राति
श्श्रुवायंचुनमंऽस्स्राशुषेणायचाशुरथायचुनमुः
शूरांयचावभेदिनेचुनमोबिल्म्मिनें ॥ ३४ ॥
नमोबिल्म्मिनें चकवचिनेचुनमोव्वर्म्मिणेच
व्वरूथिनेचुनमं ÷ श्श्रुतायंचश्श्रुतसेनायंचुन
मोदुन्दुभ्य्यायचाहनन्न्यायचुनमोधृष्ष्णवें
॥ ३५ ॥ नमोधृष्ष्णवें चप्प्रमृशायंचुनमो
निषङ्गिणेचेषुधिमतेचुनमंस्तीक्ष्णेषवेचायुधि
नेचुनमं ÷ स्वायुधायंचसुधन्न्वनेच ॥ ३६ ॥
नमुःस्त्रुत्यायचुपत्थ्यायचुनमु ः काट्यायचुनी

ष्प्यायचुनमु॑ कुल्ल्यायचसरस्यायचुनमोंना
देयायंचव्वैशुन्तायंचुनमु॑कूष्प्याय ॥ ३७ ॥
नमु॑कूष्प्यायचावुट्ट्यायचुनमोव्वीद्ध्यायचा
तुष्प्यायचुनमोमेग्घ्यायचव्विद्युत्त्यायचुनमोव्व
र्ष्यायचावुर्ष्यायचुनमोव्वात्त्याय ॥ ३८ ॥
नमोव्वात्त्यायचुरेष्म्म्यायचुनमोंव्वास्तुव्यायु
चव्वास्तुपायंचुनमु॑सोमायचरुद्द्रायंचनमंस्ता
म्म्रायंचारुणायंचनमं॑शुङ्गवे ॥ ३९ ॥ नमं॑
शुङ्गवें चपशुपतयेचुनमंऽउग्ग्रायचभीमायचु
नमोंग्ग्रेवुधायचदूरेवुधायचुनमोंहुन्त्रेचु हनी
यसेचुनमोंव्वृक्षेब्भ्योहरिकेशेब्भ्योनमंस्तारायं
॥ ४० ॥ नमं॑शम्भुवायचमयोभुवायचुन
मं॑शङ्करायचमयस्करायचुनमं॑ शिवायच
शिवतरायच ॥ ४१ ॥ नमु॑पार्य्यायचावा

र्य्यायचुनमं÷प्रतरणायचोत्तरणायचुनमस्ती
र्थ्यायचुकूल्ल्यायचुनमुःशष्प्यायचुफेन्न्याय
चुनमं÷सिकत्त्याय ॥ ४२ ॥ नमं÷सिकत्त्या
यचप्रवाह्यायचुनमं ÷ किंशिलायचक्षय
णायचुनमं ÷ कपर्दिनेचपुलस्तयेचुनमंऽइरि
ण्यायचप्रपत्थ्यायचुनमोव्रज्ज्याय ॥ ४३ ॥
नमोव्रज्ज्यायचुगोष्ठ्यायचुनमुस्तल्प्यायचु
गेह्यायचुनमोहृदय्यायचनिवेष्प्यायचुनमुः
काट्यायचगह्वरेष्ठायचनमुः शुष्क्याय
॥ ४४ ॥ नमुःशुष्क्यायचहरित्यायचनमं÷
पांसव्यायचरजस्यायचुनमोलोप्यायचोल
प्यायचुनमुऽऊर्व्यायचुसूर्म्यायचुनमं÷पर्णा
य ॥ ४५ ॥ नमं÷पर्णायचपर्णशदायचुनमंऽ
उद्गुरमाणायचाभिघ्नतेचुनमंऽआखिदतेच

प्मखिदुतेचनमं ऽइषुकृद्भ्यौधनुष्कृद्भ्यश्चवोन
मोनमोव ः किरिकेभ्योदेवाना ६ हृदयेभ्योन
मोविचिन्वत्केभ्योनमोविक्षिणत्केभ्योनमं ऽ
आनिर्हतेभ्यं ॥ ४६ ॥ द्रापेऽअन्धसस्पतेद
रिद्रनीलंलोहित ॥ आसाम्प्रजानामेषाम्पंशू
नाम्माभेर्म्मारोङ्मोचंनः किञ्चनाममत् ॥४७॥
इमारुद्द्रायंतवसेंकपर्द्दिनेंक्षयद्वीरायप्रभंराम
हेमती ॥ यथाशमसंद्द्विपदेचतुष्प्पदेविश्श्वं
म्पुष्टङ्गामेंऽअस्मिन्ननातुरम् ॥ ४८ ॥ याते
रुद्र शिवातनूश्शिवाव्विश्वाहाभेषजी ॥ शिवा
रुतस्यंभेषजीतयानोमृडजीवसें ॥४९॥ परिंनो
रुद्द्रस्यं हेतिर्व्वृणक्तुपरिंत्वेषस्यंदुर्म्मतिरंघा
योः ॥ अवंस्थिरामघवंद्भ्यस्तनुष्वमीढ्वंस्तो
कायतनंयायमृड ॥ ५० ॥ मीढुष्टमशिवंतम

शिवोनः सुमनाभव ॥ परमेवृक्षऽआयुधन्निधायकृत्तिव्वसानऽआचरपिनाकम्बिब्भ्रदागहि ॥५१॥ विकिरिद्द्रविलोहितनमस्तेऽअस्तुभगवः ॥ यास्तेसहस्रहेतयोन्न्यमस्मन्निवपन्तुताः ॥५२॥ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः ॥ तासामीशानोभगवः पराचीनामुखाकृधि ॥५३॥ असङ्ख्यातासहस्राणियेरुद्राऽअधिभूम्याम् ॥ तेषांसहस्रयोजनेवधन्वानितन्मसि ॥५४॥ अस्मिन्महत्यर्णवेन्तरिक्षेभवाऽअधि ॥ तेषांसहस्रयोजनेवधन्वानितन्मसि ॥५५॥ नीलग्रीवाःशितिकण्ठादिवंरुद्राऽउपश्रिताः ॥ तेषांसहस्रयोजनेवधन्वानितन्मसि ॥५६॥ नीलग्रीवाः शितिकण्ठाः शर्वाऽअधःक्षमाचराः ॥ ते

षांꣳसहस्रयोजनेवधन्न्वानितन्न्मसि ॥५७॥
येव्वृक्षेषुशष्प्पिञ्ञ्जरानीलग्ग्रीवाव्विलोहिताः ॥
तेषांꣳसहस्रयोजनेवधन्न्वानितन्न्मसि ॥५८॥
येभूतानामधिपतयोव्विशिखासः कपर्द्दिनः ॥
तेषांꣳसहस्रयोजनेवधन्न्वानितन्न्मसि ॥५९॥
येपथाम्पथिरक्षय ऽऐलबृदा ऽआयुर्य्युधः ॥
तेषांꣳसहस्रयोजनेवधन्न्वानितन्न्मसि ॥ ६० ॥
येतीर्थानि प्प्रचरन्तिसृकाहस्तानिषङ्गिणः ॥
तेषांꣳसहस्रयोजनेवधन्न्वानितन्न्मसि ॥६१॥
येन्नेषु व्विविद्ध्यन्तिपात्त्रेषुपिबतोजनान् ॥
तेषांꣳसहस्रयोजनेवधन्न्वानितन्न्मसि ॥६२॥
यऽएतावन्तश्श्चभूयांꣳसश्श्चदिशोरुद्द्राव्वित
स्थिरे ॥ तेषांꣳसहस्रयोजनेवधन्न्वानितन्न्मसि
॥६३॥ नमोस्तुरुद्द्रेभ्योयेदिवियेषांव्वर्षमिषवः॥

तेभ्योदशप्प्राचीर्दशदक्षिणादशप्प्रतीचीर्दशो
दीचीर्दशोर्द्ध्वाः ॥ तेभ्योनमोऽअस्तुतेनोवन्तु
तेनोम्मृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमे
षाञ्जम्भेदध्मः ॥ ६४ ॥ नमोस्तुरुद्रेभ्यो
येन्तरिक्षेयेषांवातऽइषवः ॥ तेभ्योदशप्प्राची
र्दशदक्षिणादशप्प्रतीचीर्दशोदीचीर्दशोर्द्ध्वाः॥
तेभ्योनमो ऽ अस्तुतेनोवन्तुतेनोम्मृडयन्तुतेय
न्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः६५॥
नमोस्तुरुद्रेभ्योयेपृथिव्याँय्येषामन्नमिषवः॥
तेभ्योदशप्प्राचीर्दशदक्षिणादशप्प्रतीचीर्द
शोदीचीर्दशोर्द्ध्वाः॥तेभ्योनमोऽअस्तुतेनोव
न्तुतेनोम्मृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमे
षाञ्जम्भेदध्मः॥ ६६ ॥

इति श्री रुद्रे पञ्चमोऽध्यायः ॥ ५ ॥

पुनर्नमस्ते षोडशकं पठित्वा ॐ एषते
रुद्रभागश्सहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषते
रुद्रभागऽआखुस्तेपशुश् ॥ १ ॥ अवरुद्द्रमदी
मह्यवंदेवन्त्र्यम्बकम् ॥ यथानोव्वस्यसस्करद्य
थानुश्श्रेयसस्करद्यथानोव्यवसाययात् ॥२॥
नमस्तेरुद्द्रमन्यवऽउतोतऽइषवेनमः ॥ बाहु
भ्यामुततेनमः ॥ ३ ॥ यातेरुद्द्रशिवातनूरघो
रापापकाशिनी ॥ तयानस्तन्न्वाशन्तमयागि
रिशन्ताभिचाकशीहि ॥ ४ ॥ नतम्विदाथयऽ
इमाजजानान्यद्युष्माकमन्तरम्बभूव ॥ नी
हारेणप्रावृताजल्प्याचासुतृपऽउक्थशासश्चच
रन्ति ॥ ५ ॥ विश्वकर्म्माह्यजनिष्टदेवऽआदि
द्गन्धर्वोऽअभवाद्वितीयः ॥ तृतीयःपिताज
नितौषधीनामपाङ्गर्भव्यदधात्पुरुत्रा ॥ ६ ॥

मीढुष्टमशिवतमशिवोनः सुमनाभव ॥ परमे
वृक्षऽआयुधन्निधायकृत्तिवसानऽआचरपिना
कम्बिभ्रदागहि ॥७॥ विकिरिद्रविलोहितन
मस्तेऽअस्तुभगवः ॥ यास्तेसहस्रंहेतयोन्न्य
मस्मन्निवपन्तुताः ॥८॥ सहस्राणिसहस्रशो
बाह्वोस्तवहेतयः ॥ तासामीशानोभगवःपरा
चीनामुखाकृधि ॥९॥ असङ्ख्यातासहस्राणि
येरुद्द्राऽअधिभूम्म्याम् ॥ तेषांसहस्रयोजने
वधन्वानितन्मसि॥१०॥ वयःसोमव्रतेतवमन
स्तनूषुविभ्रतः ॥ प्रजावन्तःसचेमहि॥११॥ ए
षतेरुद्द्रभागःसहस्वस्राम्बिकयातञ्जुषस्वस्वा
हैषतेरुद्द्रभागऽआखुस्तेपशुः॥१२॥ अवरुद्द्र
मदीमह्यवदेवन्त्र्यम्बकम् ॥ यथानोवस्यसस्क
रद्यथानःश्रेयसस्करद्यथानोव्यवसाययात्

॥ १३ ॥ भेषुजमंसिभेषुजङ्गवेश्वांयपुरुषायभे
षुजम् ॥ सुखम्मेषायंमेष्ष्यै ॥१४॥ त्र्यंम्बकंउय
जामहेसुगुन्धिम्पुंष्टिवर्द्धनम् ॥ उर्व्वारुकमिवुब
न्धनान्मृत्योर्म्मुंक्षीयुमामृतात् ॥ त्र्यंम्बकंउय
जामहेसुगुन्धिम्पंतिवेदनम् ॥ उर्व्वारुकमिवुब
न्धनादितोमुंक्षीयुमामुतः ॥१५॥ एतत्तेरुद्द्रा
वुसन्तेनंपुरोमूजंवुतोतींहि ॥ अवंततधन्वापि
नाकावसःकृत्तिवासाऽअहिंसन्नःशिवोतींहि
॥१६॥ त्र्यायुषञ्जमदंग्नेःकुश्यपंस्यत्र्यायुषम् ॥
यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥१७॥
शिवोनामांसिस्वधितिस्तेपितानमंस्ते ऽ अस्तु
मामांहिंसीः ॥ निर्वर्त्तयाम्म्यायुषेन्नाद्यायप्प्र
जननायरायस्पोषायसुप्प्रजास्त्वायंसुवीर्य्याय
॥ १८ ॥ इति श्री रुद्रे षष्ठोऽध्यायः ॥ ६ ॥

अथ शान्तिपाठ :

हरिः ॐ ॥ उग्रश्च । भीमश्चद्ध्वान्तश्च धुनिश्चसासहृश्चाभियुग्वाचंव्विक्षिपःस्वाहा ॥ १ ॥ अग्निः हृदयेनाशनिः हृदयाग्ग्रेणपशुपतिङ्कृत्स्नुहृदयेनभुवंय्यक्ना ॥ शर्वम्मतस्न्नाब्भ्यामीशानम्मन्युनामहादेवमन्तःपर्शव्येनोग्ग्रंदेवंव्वनिष्ठुनाव्वसिष्ठहनुःशिङ्गीनिकोश्याब्भ्याम् ॥ २ ॥ उग्ग्रँल्लोहितेनमित्रः सौव्रत्येनरुद्रन्दौर्व्रत्येनेन्द्रम्प्रक्रीडेनमरुतोबलेनसाद्ध्यान्प्रमुदा ॥ भवस्यकण्ठ्यः रुद्द्रस्यान्तःपार्श्व्यम्महादेवस्ययकृच्छर्वस्यवनिष्ठुःपशुपतेः पुरीतत् ॥३॥ वाजश्च । मेप्प्रसवश्चमेप्रयतिश्चमेप्रसितिश्चमेधीतिश्चमे क्रतुश्चमे स्वरश्चमेश्श्लोकश्चमे श्रवश्चमेश्श्रुतिश्चमेज्ज्योतिश्चमे

स्त्रश्च मे यज्ञेन कल्पन्ताम् ॥ १ ॥ प्राणश्च
मेपानश्च मेव्यानश्च मेसुश्च मेचित्तञ्च मऽआधी
तञ्च मेव्वाक्च मे मनश्च मेचक्षुश्च मे श्रोत्रञ्च मेद
क्षंश्च मेबलञ्च मेयज्ञेन कल्पन्ताम् ॥ २ ॥

इमामेऽअग्नऽइष्टकाधेनवः सन्त्वेका-
चदशचदशचशतञ्चशतञ्चसहस्रञ्च-
सहस्रञ्चायुतञ्चायुतञ्चनियुतञ्चनि-
युतञ्चप्प्रयुतञ्चार्बुदञ्चन्न्यर्बुदञ्च -
समुद्रश्चचमध्यञ्चान्तश्चचपरार्द्ध-
श्चचैतामेऽअग्नऽइष्टकाधेनवः सन्त्व-
मुत्रामुष्मिँल्लोके ॥६॥

व्विश्श्वतश्चक्षुरुतव्विश्श्वतोमुखो-
व्विश्श्वतोब्बाहुरुतव्विश्श्वतस्पात् ॥
सम्बाहुभ्यान्धमतिसम्पतत्रैर्द्यावाभूमी-
जनयन्देवऽएकः ॥७॥

हरिः॒ ॐ। ऋचं॒वाच॒म्प्रप॑द्ये॒मनो॒यजुः॒ प्रप॑

द्ये॒साम॑प्रा॒णम्प्रप॑द्ये॒चक्षुः॒श्रोत्र॒म्प्रप॑द्ये॒॥ वागो

जः॒स॒हौजो॒मयि॑प्रा॒णापा॒नौ॥१॥यन्मे॑छि॒द्रञ्च

क्षु॑षो॒हृद॑यस्य॒मन॑सो॒वाति॑तृ॒ण्णम्बृह॒स्पति॑र्मे॒त

द्द॑धातु॥ शन्नो॑भवतु॒भुव॑नस्य॒यस्पति॑ः॥ २॥

भूर्भुवः॒स्वः॒। तत्स॑वि॒तुर्वरे॑ण्य॒म्भर्गो॑दे॒वस्य॑धी

महि॥ धियो॒यो नः॒प्रचो॒दया॑त्॥३॥ कया॑न

श्चि॒त्रऽआभु॑वदू॒तीस॒दावृ॑धः॒सखा॑॥कया॒शचि॑

ष्ठया वृ॒ता॥४॥ कस्त्वा॑। स॒त्यो मदा॑ना॒म्मꣳहि॑

ष्ठो मत्स॒दन्ध॑सः॥ दृ॒ढाचि॑दा॒रुजे॒वसु॑॥५॥ अ॒

भीषुणः॑। सखी॑नामवि॒ता ज॑रितॄ॒णाम्। श॒तम्भ॑

वास्यू॒तिभि॑ः॥ ६॥ कया॒त्वन्न॑ऽऊ॒त्याभिप्रम॑

न्दसे वृषन्। कया॑स्तो॒तृभ्य॒ऽआभ॑र॥७॥इन्द्रो॒

विश्व॑स्य राजति॥ शन्नो॑ऽअस्तु द्वि॒पदे॒शञ्चतु॑

ष्पदे॥८॥ शन्नोमित्रःशंवरुणःशन्नोभवत्व
र्य्यमा॥ शन्नऽइन्द्रोबृहस्प्पतिःशन्नोविष्ष्णु
रुरुक्रमः॥९॥ शन्नोवातः॥ पवताᳬशन्नस्तप
तुसूर्य्यः॥ शन्नःकनिक्रदद्देवःपर्ज्जन्योऽअभि
वर्षतु॥१०॥ अहानिशम्भवन्तुनःशᳬरात्रीः
प्प्रतिधीयताम्। शन्नऽइन्द्राग्नीभवतामवोभिः
शन्नऽइन्द्रावरुणारातहव्या॥ शन्नऽइन्द्रापूष
णाव्वाजंसातौशमिन्द्रासोमासुवितायशंय्योः
॥११॥शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये॥
शंय्योरभिस्रवन्तुनः॥१२॥ स्योनापृथिवि।
नोभवान्नृक्षरानिवेशनी॥ यच्छानःशर्म्मस
प्प्रथाः॥१३॥ आपोहि। ष्ठामयोभुवस्तानऽऊ
र्जेदधातन॥ महेरणायचक्षसे॥१४॥ योवःशि
वतमोरसस्तस्यभाजयतेहनः॥ उशतीरिवमा

तरं÷ ॥१५॥ तस्माऽअरंङ्गमामवोयस्यक्षयां
युजिन्वंथ॥ आपोजुनयंथाचनः॥१६॥ द्यौःशा
न्तिरन्तरिक्षुःशान्ति÷ पृथिवीशान्तिरापःशा
न्तिरोषधंयुःशान्ति÷॥ वनुस्पतंयुःशान्तिर्वि
श्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्वः शान्तिःशा
न्तिरेवशान्तिःसामाशान्तिरेधि॥१७॥ दृतेदृः
हंमामित्रस्यंमाचक्षुषासर्वाणिभूतानिसमीक्ष
न्ताम् ॥ मित्रस्याहञ्चक्षुषासर्वाणिभूतानिस
मीक्षे॥ मित्रस्यचक्षुषासमीक्षामहे ॥१८॥ दृते
दृःहंमा॥ ज्योक्तेसुन्दृशिजीव्यासुञ्ज्योक्तेसु
न्दृशिजीव्यासम्॥१९॥ नमंस्तेहरंसेशोचिषेन
मंस्तेऽअस्त्वर्चिषे॥ अन्याँस्तेऽअस्मत्तंपन्तु
हेतयं÷पावकोऽअस्मभ्यंःशिवोभंव॥२०॥
नमंस्ते।अस्तुविद्युतेनमंस्तेस्तनयित्नवे॥ नमं

स्तेभगवन्नस्तुयतःस्वःसमीहसे॥२१॥यतोय
तःसमीहसेततोनोऽअभयङ्कुरु ॥ शन्नःकुरु
प्प्रजाभ्योभयन्नःपशुभ्यः॥२२॥सुमित्त्रि
यानुऽआपऽओषधयःसन्तुदुर्म्मित्त्रियास्तस्मै
सन्तुयोस्मान्द्वेष्टियञ्चवयन्द्विष्मः॥२३॥त
च्चक्षुर्द्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशर
दःशतञ्जीवेमशरदःशत ६ शृणुयामशरदः
शतम्प्रब्रवामशरदःशतमदीनाःस्यामशर
दःशतम्भूयश्चशरदःशतात् ॥ २४ ॥

इति रुद्रे शान्त्यध्यायः ॥ ६ ॥

हरिःॐ ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाःस्व
स्तिनःपूषाविश्ववेदाः॥ स्वस्तिनस्तार्क्ष्योऽअ
रिष्टनेमिःस्वस्तिनोबृहस्पतिर्द्दधातु ॥ १ ॥
विश्श्वानि देवसवितर्दुरितानिपरासुव॥ यद्भ
द्रन्तन्नऽआसुव॥११॥ ॐ नमः शिवाय शान्तिः ३

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नाति भवे भवस्व मां भवोद्भवाय नमः ॥१॥ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः। कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः। सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥२॥ अघोरेभ्योथघोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥३॥ तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् ॥४॥ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम्। ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥५॥ ॐ हरहर महादेव। ॐ सदाशिवाय नमः ॥

# शिवस्य विशेषपूजा

(शिवजीको उत्तराङ्ग विशेषपूजा)

## (क) रुद्रपद्धत्यनुसारेण विधिना

(रुद्राष्टाध्यायीमा उल्लेख भए अनुसारको विधिले)

### वस्त्रम्

ॐ असौ योवसर्पति नीलग्रीवो विलोहितः। उतैनङ्गोपाऽअदृश्रन्नदृश्रन्नुदहार्यः सदृष्टो मृडयाति नः ॥

ॐ सर्वभूषाधिके सौम्ये लोकलज्जा निवारणे।
मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥

### यज्ञोपवीतम्

ॐ नमोऽस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे। अथोयेऽअस्य सत्वानो हन्तेभ्यो करन्नमः ॥

नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्।
उपवीतं चोत्तरीयं गृहाण परमेश्वर ॥

### चन्दनम्

ॐ प्रमुञ्च धन्वनस्त्वमुभयो रात्न्योर्ज्याम्। याश्च ते हस्तऽइषवः पराता भगवो वप ॥

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥

# अक्षतान्

ॐ अक्षन्नमीमदन्त ह्यवप्प्रियाऽअधूषत । अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विन्द्र ते हरी ॥

अक्षतांश्च सुरश्रेष्ठ कुंकुमाक्तान् सुशोभनान् ।
मया निवेदितान् भक्त्या गृहाण परमेश्वर ।

# पुष्पाणि

ॐ विज्यन्धनुः कपर्दिनो विशल्यो बाणवाँऽउत अनेशन्नस्य याऽइषवऽआभुरस्य निषङ्गधिः ॥

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।
मयाऽनीतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥

# बिल्वपत्राणि

ॐ शिवो भव प्रजाभ्यो मानुषीभ्यस्त्वमङ्गिरः । मा द्यावापृथिवीऽअभिशोचीर्म्मान्तरिक्षं मा वनस्पतीन् ॥

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुधम् ।
त्रिजन्मपापसंहारमेकबिल्वं शिवार्पणम् ॥

# धूपम्

ॐ या ते हेतिर्मीढुष्टम हस्ते बभूवते धनुः । तयास्मान्विश्वतस्त्वमयक्ष्मया परिभुज ॥

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

# दीपम्

ॐ परिते धन्वनो हेतिरस्मान्वृणक्तु विश्वतः। अथोयऽ-इषुधिस्तवारेऽअस्म्मन्निधेहि तम् ॥

आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥

# नैवेद्यम्

ॐ अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे। निशीर्य शल्या नाम्मुखा शिवो नः सुमना भव ॥

शर्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम्।
उपहार समानोतं नैवेद्यं प्रतिगृह्यताम् ॥

# आचमनीयम्

एलोशीरलवङ्गादि कर्पूरादि सुवासितम्।
प्राशनायाऽऽहृतं तोयं गृहाण परमेश्वर ॥

# ताम्बूलम्

ॐ नमस्तऽआयुधायानातताय धृष्णवे। उभाभ्यामुत ते नमो बाहुभ्यान्तव धन्वने ॥

पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम्।
एलाचूर्णादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

## दक्षिणाम्

ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेकऽ आसीत्। सदाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥

हिरण्य गर्भ गर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

## नीराजनम्

ॐ आ रात्रि पार्थिवꣳ रजः पितुरप्रायि धामभिः । दिवः सदाꣳसि बृहती वितिष्ठसऽआ त्वेषं वर्तते तमः ॥

ॐ चन्द्रादित्यौ च धरणी विद्युदग्निस्तथैव च ।
त्वमेव सर्वज्योतींषि तेन नीराजयाम्यहम् ॥

## कर्पूरार्तिक्यम्

ॐ इदꣳ हविः प्रजननम्मेऽअस्तु दशवीरꣳ सर्वगणꣳ स्वस्तये । आत्मसनि प्रजासनि पशुसनि लोकसन्यभयसनि अग्निः प्रजां बहुलाम्मे करोत्वन्नम्पयोरेतोऽअस्मासु धत्त ॥

कदलीगर्भसंभूतं घनसारं मनोहरम् ।
आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥

## प्रदक्षिणाम्

ॐ मानो महान्तमुत मानोऽअर्भकम्मानऽउक्षन्तमुतमान

ऽउक्षितम् । मानोवधीः पितरम्मोतमातरम्मानः प्रियास्तन्वो रुद्ररीरिषः ॥

यानि कानि च पापानि जन्मान्तरकृतानि च ।
तानि सर्वाणि नश्यन्तु प्रदक्षिणपदे पदे ॥

इत्युपचारान्समर्प्य, पुष्पाण्यादाय बद्धाञ्जलिः प्रार्थयेत्–

ॐ मा नस्तोके तनये मा नऽआयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । मा नो वीरान्रुद्र भामिनो वधीर्हविष्मन्तः सदमित्त्वा हवामहे ।

नानासुगन्धिपुष्पाणि देशकालोद्भवानि च ॥
पुष्पाञ्जलिं मयादत्तं गृहाण परमेश्वर ॥
आवाहनं न जानामि नजामि विसर्जनम् ।
पूजां चैव न जानामि प्रसीद परमेश्वर ॥
विधिच्युतं भक्तिहीनमुपचारविवर्जितम् ।
यत्पूजितोऽसि भगवंस्तेनापीश प्रसीदसि ॥
ग्रहपीडाः प्रशाम्यन्तु भूतवाधा विनश्यतु ।
ज्वरादयोऽखिलारोगाः विनश्यन्तु त्वदीक्षया ॥
शिवशंकर विश्वात्मन् भूतेश्वर दयामय ।
भवत्स्मरणमात्रेण रक्ष नः पक्षवर्जितान् ॥
कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ।
सदावसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ।
करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वाऽपराधम् ।
विहितमविहितं वा सर्वमेतत् क्षमस्व
जयजयकरुणाब्धे ! श्री महादेव ! शम्भो ! ॥

इति क्षमापयेत् ।

# उत्तराङ्गकर्म

## (क) अर्घ्यनिवेदनम्

ॐ रक्ष रक्ष महादेव रक्ष त्रैलोक्य रक्षक ।
भक्तानामभयंकर्ता त्राता भव भवार्णवात् ॥
वरद त्वं वरं देहि वाञ्छितं वाञ्छितार्थद ।
अनेन सफलार्घ्येण फलदोऽस्तु सदा मम ॥

## (ख) दक्षिणासङ्कल्पः

ॐअद्येह पूर्वसङ्कल्प सिद्धिरस्तु . . . . . . मम श्रीसाम्बसदाशिवप्रीतिद्वारा सर्वाभ्युदयावाप्तये (अमुक) कामनासिद्धये कृतस्य (अमुक) रुद्राभिषेक कर्मणः साङ्गतायै (सप्तसती पाठकर्मणश्च साङ्गतायै) इमां दक्षिणां . . . . यथानाम दैवतां नानानाम गोत्रेभ्यो ब्रह्मणेभ्यो यथाभागं विभज्य यथाकाले दातुमहं जले उत्सृजे ।

## (ग) विसर्जनम्

गन्धपुष्पाक्षतादिभिर्देवान् विसर्जयेत्

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥
गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर ।
यत्र ब्रह्मादयो देवास्तत्र गच्छ सुरेश्वर ॥
आवाहनं नजानामि नजानामि विसर्जनम् ।

मन्त्रपूजां नजानामि क्षमस्व परमेश्वर ॥
इति कर्मेश्वरार्पणम्—ॐ कायेन वाचा ० ॥

## अभिषेकः

हरिः ॐ द्यौः शान्तिरन्तरिक्ष ँ शान्तिः पृथिवीशान्तिराप: शान्तिरोषधयः शान्तिः । वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व ँ शान्तिः शान्तिरेव शान्तिः सामाशान्तिरेधि ॥ तच्चक्षुर्देव हितम्पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतञ्जीवेम शरदः शत ँ शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात् ॥ स्वस्तिन ऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्द्दधातु ॥ विश्वानि देवसवितर्दुरितानि परासुव । यद्भद्रं तन्नऽआसुव ।

॥ इति ॥

## आशिषमन्त्रपाठः

गन्धपुष्पादि प्रसादादिकं हस्तेन गृहीत्वा—

हरिः ॐ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामा राष्ट्रे राजन्यः शूरऽइषव्योतिव्व्याधी महारथो जायतान्दोग्ध्री धेनुर्व्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥

दीर्घायुस्तऽओषधे खनिता यस्मै च त्वा खनाम्यहम् । अथो त्वन्दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ॥ पुनस्त्वादित्या रुद्रा वसवः समिन्धतां पुनर्ब्रह्माणो वसुनीथ यज्ञैः । घृतेन त्वं तन्वं वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥ मनसः काममाकूतिं वाचः सत्यमशीय । पशूना ঁ रूपमन्नस्य रसो यशः श्रीः श्रयताम् ॥

इत्याशिषमन्त्रान्पठित्वा यजमानाय प्रसादादिकं दद्यात्–

ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते । धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

॥ इति ॥

## प्रसादवितरणम्

ततो यजमानहस्ते रक्षासूत्रं बध्नीयात्

ॐ येन बद्धो बलीराजा दानवेन्द्रो महाबलः ।
तेन त्वामपि बध्नामि रक्षे मा चल मा चल ॥
त्वं यविष्ठ दाशुषो नॄँः पाहि श्रृणुधी गिरः ।
रक्षा तो कमुत त्मना ॥

॥ इति रुद्राभिषेकविधिः ॥

## रुद्राभिषेकार्थमावश्यकान्युपकरणानि

(रुद्राभिषेकका निमित्त आवश्यक उपकरण)

गन्धम् । सिन्दूरम् । अभिरकम् । अक्षताः । यवाः । तिलाः । पुष्पाणि । दूर्वाङ्कुरान् । दुग्धम् । दधि । घृतम् । मधु । शर्करा । पूगीफलम् । यज्ञोपवीतम् । वस्त्रम् ।

(धौतवस्त्रम्) सर्षपः । सर्वौषधीः । आम्र अश्वत्थ आदिपल्लवाः । रक्षासूत्रम् । बिल्वपत्राणि । धूपः । दीपः । नैवेद्यम् । फलानि । ताम्बूलम् । कर्पूरम् । कुशाः । कर्मपात्रम् । अर्घ्यपात्रम् । त्रिपादिका । जलधारा पात्रम् । त्रिपादिका । बृहज्जलाधार-पात्रम् । शिवलिङ्गः । आसनम् । इत्यादि ॥

(रुद्राभिषेक विधिमा उल्लेख भए अनुसार शिक्षकले छात्रलाई प्रयोगात्मक शिक्षा दिनुपर्छ । यसरी प्रयोगात्मक शिक्षा दिंदा सम्भव भएसम्म कक्षामा नै रुद्राभिषेकलाई आवश्यक वस्तुहरू जम्मा गरी छात्रले आफैं प्रयोग गर्न सक्ने गरी सारा अङ्गकर्म (पुण्याहवाचन, दीप, कलश, गणेशपूजा, रक्षाबन्धनपूजा र उत्तराङ्गकर्म) प्रधानकर्म र शिवजीको पञ्चामृतले स्नान रुद्राभिषेक, जलधारासहित रुद्रीय मन्त्रपाठ, शिवजीको विशेषपूजा सबै कुरा प्रयोग गरेर बुझाइदिने । अथवा शिवजीको मन्दिरमा वा अन्य कसैका घरमा रुद्राभिषेक भैरहेको ठाउँमा लगी प्रयोग गरे गराएको देखाई बुझाइदिने गर्नुपर्छ ।)

## अभ्यासः

१– सङ्कल्पवाक्ये विचारणीया विषयाः के ?

२– कर्मपात्र निर्माणविधौ प्रयुक्तमन्त्राणां प्रतीकानि लेख्यानि !

३– अर्घ्यपात्रे प्रक्षेप्तव्यानि द्रव्याणि कानि ?

४– रुद्राभिषेके रङ्गवल्लीरचना कथं क्रियते ?

५– पुण्याहवाचनमन्त्रप्रतीकानि कानि ? सर्वं लेख्यानि !

खण्ड ९

# सत्यनारायणपूजा

श्रीमन्मङ्गलमूर्तये नमः ।

## परिचय

मनुष्यका चार पुरुषार्थ छन् धर्म, अर्थ, काम, मोक्ष। यिनमा अर्थ र काम अर्थात् धनोपार्जन र विषयसुख खास पुरुषार्थ होइनन्, आ-प्राफ्ना प्रारब्ध अनुसार मिल्छन् । बाँकी रह्यो धर्म र मोक्ष, यिनमा पनि धर्म त साधन मात्र हो मोक्ष साध्य हो । साधनको सदुपयोगद्वारा साध्यवस्तु प्राप्त गर्नु खास पुरुषार्थ हो । सबैको अन्तिम लक्ष्य हुन्छ मोक्षको ।

धर्मका धेरै भेद छन्– स्नान, दान, व्रत, यज्ञ, जप, तप, योग, आदि। यिनीहरूमा कुनै समयसाध्य छन् कुनै श्रमसाध्य र कुनै अर्थसाध्य । यी सबै प्रायः सामर्थ्य सापेक्ष छन् । समयको प्रतीक्षा, धनव्यय र परिश्रम ।

धर्मसेवाका केही पक्षमा ठूलो अर्थराशि, मनको औदार्य र धैर्यको आवश्यकता भए पनि अर्को पक्षमा अल्प धन, अल्प श्रम र अल्प समयबाट पनि महान् धर्मसेवा असम्भव छैनन् । जसमध्ये एउटा महान् व्रत छ सत्यनारायणव्रत ।

सत्यनारायणको व्रत गर्न त्यति धेरै कुराको आवश्यकता पर्दैन । थोरै समयमा थोरै श्रमले र थोरै खर्चले पनि यो व्रत पूर्ण हुन्छ। श्रद्धा–भक्ति राखेर सत्यनारायणको व्रत गरेमा उहाँको आशीर्वादबाट यस लोकमा पुत्रपौत्र, धन-धान्यादि सम्पत्ति (नाना सुख भोग) र अर्को लोकमा भगवत्पद प्राप्ति हुन्छ ।

## (क) कर्मपात्रनिर्माण

**कृतनित्यक्रियो व्रती रवि संक्रान्तिदिने पौर्णमास्यामेकादश्यां वा यस्मिन् कस्मिन् शुभदिने सायंकाले स्नानं कृत्वा शुद्धवस्त्रं परिधाय पूजास्थानमागत्य पवित्राऽऽसने उपविश्य पवित्रधारणं कृत्वा दीपं प्रज्ज्वाल्य आचम्य कर्मपात्रं कुर्यात्– तत्रादौ -"ॐ यद्देवा देवहेडनम्" इति कण्डिकात्रयं पठित्वा देवानावाह्य "ॐ पवित्रेस्थो वैष्णव्यौ"इति मन्त्रेण पवित्रं क्षिपेत्। "ॐ शन्नोदेवी:" इति मन्त्रेण जलम् । "ॐ गन्धद्वाराम्" इति चन्दनम् । "ॐ अक्षन्नमीमदन्त" इत्यक्षतान् ।**

"ॐ यवोसि" इति यवान्। "ॐ श्रीश्चते लक्ष्मी :" इति मन्त्रेण पुष्पं क्षिपेत्। ततः कुशत्रयसहितं कर्मपात्रोदकमादाय—"अपवित्रः पवित्रो वा०" इति आत्मानं द्रव्याणि च सिञ्चेत्। ततः तत्कुशादिकमादाय प्रतिज्ञासंकल्पं कुर्यात् –

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ देशकालौ संस्मृत्य मम पुत्रपौत्राद्यनेकविध-धनधान्यादिनानासुखभोगानन्तरं सकलदुरितक्षयसर्वारिष्टशान्तिपूर्वकयथोक्त-फलप्राप्त्यर्थं श्रीपरमेश्वरप्रीत्यर्थं सत्यपुरवासकामनया यथामिलितोपचारः दीपकलशगणेशनवग्रहेन्द्रादिदशदिक्पालदेवतापूजनपूर्वकं साङ्ग सपरिवार रमासहित-श्रीसत्यनारायण पूजनं तत्कथाश्रवणञ्चाहं करिष्ये।

इति सङ्कल्प्य ब्राह्मणवरणं कुर्यात्।

# अर्घ्यस्थापनम्, शङ्खार्घ्यस्थापनञ्च

स्वस्य दक्षिणे अर्घ्यपात्रं वामे शङ्खार्घ्यपात्रं च संस्थाप्य जलादि द्रव्याणि प्रक्षिप्य "ॐ गङ्गे च यमुने चैव' इति सम्पूज्य मुद्राप्रदर्शनादिकं च कुर्यात्।

# दीपपूजा

"ॐ पृष्टोदिवि, इति ॐ नमोऽस्त्वनन्ताय इति मन्त्रेण च दीपं सम्पूज्य, "ॐ नमः कमलनाभाय" इत्यादि मन्त्रेण दीपं प्रार्थयेत्।

# कलशपूजा

ततः कलशस्थापनविधिना कलशं संस्थाप्य, वरुणमावाह्य गन्धादिभिः सम्पूज्य (देवदानवसंवादे) इत्यादि मन्त्रैः प्रार्थयेत्।

# गणेशपूजा

ततः गणानान्त्वा इति मन्त्रेण गणेशमावाह्य गन्धादिषोडशोपचारैः सम्पूज्य (वक्रतुण्ड महाकाय) इत्यादिना प्रार्थयेत्।

ततः कलशस्कन्धप्रदेशे

"ॐ गणपत्यादि पञ्चायतनेभ्यो नमः" इत्यादि नाममन्त्रैः पूजयेत् ।

(अस्य विशेषपूजाप्रकारः रुद्राभिषेके द्रष्टव्यम्) ।

(कर्मपात्रको निर्माण अर्घ्यस्थापन र दीप, कलश, गणेशपूजाको विधि रुद्रीको पूजाविधिमा सबै उल्लेख गरिएको हुँदा यहाँ संक्षेप मात्र राखिएको छ । विशेष त्यहींबाट हेर्नुहोस् ।)




## (ख) प्रधानकलशस्थापनं पूजनञ्च

मध्ये धान्योपरि कलशं संस्थाप्य पूर्वोक्तकलशपूजाविधिना कलशं सम्पूज्य ततस्ताम्रस्थाल्यामष्टदलं विलिख्य कलशोपरि स्थापयेत् ।

## (ग) स्थाल्यामष्टदलेषु पीठदेवता–दिक्पाल–द्वारपालादि देवतापूजनम्

### पीठपूजा

पूर्वे– ॐ विमले इहागच्छ इह तिष्ठ मम पूजां गृहाण यावत्पूजां करोमि तावत्त्वं सुस्थिरा भव । इत्यावाहय पाद्यादिभिरुपचारैः पूजयेत् । इत्यनेनैव क्रमेण,

आग्नेये– ॐ ज्ञानरूपायै नमः। दक्षिणे–ॐ क्रियायै नमः। नैऋत्ये– ॐ योगायै नमः। पश्चिमे–ॐ प्रभायै नमः। वायव्ये– ॐ सत्यायै नमः। उत्तरे– ॐ अनुग्रहायै नमः। ईशाने– ॐ ईशान्यै नमः। मध्ये– ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगाय योगपद्मपीठात्मने नमः। इति आवाहनादि पाद्यादिभिरुपचारैः पीठपूजां कुर्यात्।

## दिक्पालपूजा

पूर्वदले– ॐ भो इन्द्र इहागच्छ इह तिष्ठ यावत् पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव। इत्यावाह्य पाद्यादिभिरुचारैः पूजयेत्। एवं क्रमेण, आग्नेयदले– ॐ अग्ने नमः। दक्षिणदले- ॐ यमाय नमः। नैऋत्यदले- ॐ निर्ऋतये नमः। पश्चिमदले– ॐ वरुणाय नमः। वायव्यदले– ॐ वायवे नमः। उत्तरदले– ॐ कुबेराय नमः। ईशानदले– ॐ ईशानाय नमः। पूर्वेशानयोर्मध्ये- ॐ ब्रम्हणे नमः। निऋतिवरुणमध्ये– ॐ अनन्ताय नमः। इति पाद्यादिभिरुपचारैः पूजयेत्।

पुनः पूर्वे– ॐ लक्ष्म्यै नमः। दक्षिणे–ॐ सरस्वत्यै नमः। पश्चिमे– ॐ आदि-पुरुषाय नमः। उत्तरे– ॐ अनादि पुरुषाय नमः। आग्नेये– ॐ गणपतये नमः। नैऋत्ये– ॐ सूर्याय नमः। वायव्ये– ॐ अम्बिकायै नमः। ईशाने–ॐ शिवाय नमः। वायव्ये– ॐ श्रीरामाय नमः। तत्रैव– ॐ श्रीलक्ष्मणाय नमः।

## द्वारपालपूजा

पूर्वे– ॐ नन्दाय नमः। आग्नेये– ॐ सुनन्दाय नमः। दक्षिणे– ॐ बलाय नमः। नैऋत्ये– ॐ प्रबलाय नमः। पश्चिमे–ॐ जयाय नमः। वायव्ये– ॐ विजयाय नमः। उत्तरे– ॐ सुशीलाय नमः। ईशाने – ॐ पुण्यशीलाय नमः। इति आवाहनादि पाद्यादिभिरुपचारैः सम्पूज्य धूपं दीपं नैवेद्यादिकं च कुर्यात्।

## (घ) प्रधानदेवतापूजा

ततः स्थालीमध्ये सुवर्णप्रतिमां संस्थाप्य तत्र रमासहितस्य श्रीसत्यनारायणस्य पूजां कुर्यात् तत्र कृमः–

प्राणप्रतिष्ठा– ॐ आँ ह्रींक्रौं रमासहितस्य श्रीसत्यनारायणस्य जीवप्राण वाक्पाणीपादपायूपस्थ सर्वेन्द्रियाणि इहागत्य यथासुखं चिरं तिष्ठन्तु नमः।

ॐ मनोजुतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्व-रिष्टं यज्ञ ꣳ समिमन्दधातु । विश्वेदेवासऽइह मादयन्तामों ३ प्रतिष्ठ ॥

इति मन्त्रेण प्राणप्रतिष्ठां कुर्यात् ।

## ततः आवाहनम्

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । सभूमि ꣳ सर्वत स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥

ॐ भूर्भुवः स्वः रमासहित श्रीसत्यनारायण इहागच्छ इह तिष्ठ मम पूजां गृहाण यावत्पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव ॥

## ततो ध्यानम्

ॐ ध्यायेत्सत्यं गुणातीतं गुणत्रयसमन्वितम्
लोकनाथं त्रिलोकेशं कौस्तुभाभरणं हरिम् ॥
सुलोचनं चतुर्बाहुं शङ्खचक्रगदाधरम् ।
किरीटिनं कुण्डलिनं वनमालाविभूषितम् ॥
कङ्कणाङ्गुलिभूषाभिः केयूरैश्च विराजितम् ।
गोविन्दं गोकुलानन्दं ब्रह्माद्यैरभिपूजितम् ॥

ध्यानं समर्पयामि रमासहिताय श्रीसत्यनाराणाय नमः ।

## तत आसनम्

कुशद्वयम्

ॐ पुरुषऽएवेद ꣳ सर्वं यद्भूतं यच्च भाव्यम् । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥

नानारत्नसमायुक्तं कार्तस्वरविभूषितम् ।
आसनं देवदेवेश गृहाण पुरुषोत्तम ।।
आसनं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।।

## पाद्यम्

ॐ एतावानस्य महिमातो ज्यायाँश्च पूरुषः । पादोस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि ।।

नानातीर्थाहृतं तोयं निर्मलं पुष्पमिश्रितम् ।
पाद्यं गृहाण देवेश विश्वरूप नमोऽस्तु ते ।।
पाद्यं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।

## अर्घ्यम्

ॐ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः । ततो विष्वङ् व्यक्रामत्साशनानशनेऽअभि ।

गन्धपुष्पाक्षतोपेतं दधिदूर्वासमन्वितम् ।।
अर्घ्यं गृहाण देवेश मया दत्तं हि भक्तितः ।।
अर्घ्यं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।।

## आचमनीयम्

ॐ ततो विराडजायत विराजोऽअधिपूरुषः । सजातोऽअत्यरिच्यत पश्चाद् भूमिमथो पुरः ।।

कर्पूर वासितं तोयं मन्दाकिन्याः समाहृतम् ।
आचम्यतां जगन्नाथ मया दत्तं हि भक्तितः ।।
आचमनं समर्पयामि रमासहिताय श्रीसत्यनारायण नमः ।

# मधुपर्कम्

ॐ दधि क्षौद्रमिदं शुभ्रं कपिलायाः सुगन्धिकम् ।
सुस्वादु मधुरं देव मधुपर्कं गृहाण भो ।
मधुपर्कं सम० र० श्रीसत्य० नमः ॥

# पुनराचमनीयम्

ॐ शुचिर्वाप्यशुचिर्वाऽपि यस्य स्मरणमात्रतः ।
शुद्धिमाप्नोति तस्मै ते पुनराचमनीयकम् ।
पुनराचमनीयं समर्पयामि र० स० श्रीस० नमः ॥

# पञ्चामृतम्

तत्रादौ पयसा

ॐ पयः पृथिव्यां पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः पयस्वतीः प्रदिशः सन्तु मह्यम् ।

देवाद्यैर्वन्दिता धेनुः सर्वपापप्रणाशिनी ॥
त्वं क्षीरस्नापितो देव नित्यं शोकहरो भव ॥
पयस्नानं सम० र० श्रीसत्य० ।

# शुद्धोदकेन

ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्व ँ हि रिप्रम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि । दीक्षातपसोस्तनूरसि तान्त्वा शिवा ँ सग्मा परिदधे भद्रं वर्णं पुष्यन् ॥

## दध्ना

ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य वाजिनः । सुरभि नो मुखाकरत्प्रणऽ आयू ॆ षि तारिषत् ॥

पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ।
दध्यर्पितं मया देव स्नानाय प्रतिगृह्यताम् ॥

## शुद्धोदकेन

ॐ आपोऽअस्मानिति० शुद्धोदकम् ।

## घृतेन

ॐ घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम । अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षिहव्यम् ॥

रसानामुत्तमं त्वाज्यं देवाना च सदाप्रियम् ।
तेन त्वं स्नापितो देव मम कान्तिप्रदो भव ।

## जलेन

ॐ आपोऽअस्मानिति० ।

## मधुना

ॐ मधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ॆ रजः । मधु-

द्यौरस्तु नः पिता ॥ मधुमान्नो वनस्पतिर्मधुमाँऽअस्तु सूर्यः। माध्वीर्गावो भवन्तु नः ॥

यस्य धारणमात्रेण तृप्तिं यान्ति पितामहाः।
मधुना स्नापितो देव नित्यं शोकहरो भव ॥

## शुद्धोदकेन

ॐ आपोऽअस्मानिति०।

## शर्करया

ॐ अपा ꣳ रसमुद्व यस ꣳ सूर्ये सन्त ꣳ समाहितम्। अपा ꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतोसीन्द्राय त्वा जुष्टङ् गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका।
मलापहारिणी दिव्या स्नानाय प्रतिगृह्यताम्।

## शुद्धोदकेन

ॐ आपोऽअस्मानिति०।

## वस्त्रम्

ॐ तस्माद्यज्ञात्सर्वहुतः सम्भृतम्पृषदाज्यम्। पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये।

पीताम्बरयुगं देव सर्वकामार्थसिद्धये ।
मया निवेदितं भक्त्या गृहाण जगदीश्वर ॥

वस्त्रयुग्मं समर्पयामि र० स० श्रीस० नमः ।

## यज्ञोपवीतम्

ॐ तस्माद्यज्ञात्सर्वहुत ऽ ऋचः सामानि जज्ञिरे । छन्दा ꣳसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥

दामोदर नमस्तेऽस्तु त्राहि मां भवसागरात् ।
ब्रह्मसूत्रं सोत्तरीयं गृहाण जगदीश्वर ।

यज्ञोपवीतं समर्पयामि र० स० श्रीस० नमः।

## आभूषणादीनि

ॐ किरीटकुण्डलादीनि काञ्चीवलययुग्मकम् ।
कौस्तुभं वनमालां च भूषणानि भजस्व भो ॥

आभूषणं समर्पयामि र० स० श्री० स० नमः ।

## गन्धम्

ॐ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषजातमग्रतः । तेन देवाऽ अयजन्त साध्या ऽ ऋषयश्च ये ।

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ।
विलेपनं सुरश्रेष्ठ प्रीत्यर्थं प्रतिगृह्यताम् ॥

श्रीखण्डचन्दनं समर्पयामि र० स० श्री० स० नमः ।

## तिलयवाक्षताः

ॐ धान्यराजा स्वमाङ्गल्या विष्णुप्रीतिकरा यवाः ।
तस्मादेषां प्रदानेन ममास्त्वविकलं फलम् ॥

# पुष्पम्

ॐ श्रीश्चते लक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूप-मश्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाण सर्वलोकम्मऽइषाण ।

इमानि पुष्पाणि मनोहराणि सुरासुराणामपि दुर्लभानि ॥
कल्पद्रुमादि द्रुमजानि तानि पुष्पाञ्जलिर्मेऽस्तु सुखाय नित्यम् ॥

नानाविधपुष्पाणि समर्पयामि र० स० श्री स० नमः ॥

ततो लक्ष्मीप्रीतये सिन्दूरादि सौभाग्यद्रव्याणि समर्पयेत् ।

सिन्दूरं च वरं रम्यं भाले शोभाविवर्धनम् ।
पूरणं भूषणानाञ्च सिन्दूरं प्रतिगृह्यताम् ॥

दिव्यरत्नसमायुक्ता वन्हिभानुसमप्रभाः।
गात्राणि शोभयिष्यन्ति ह्यालङ्काराः सुरेश्वरि ॥

सौभाग्यद्रव्याणि समर्पयामि श्रीरमायैः नमः ॥

# ततोऽङ्गपूजा

ॐविष्णवे नमः पादौ पूजयामि । ॐ नारायणाय नमः जंघे पूजयामि । ॐ केशवाय नमः गुल्फौ पूजयामि । ॐ रामाय नमः जानुनी पूजयामि ।ॐ कृष्णाय नमः मेढ्ं पूजयामि । ॐ नृसिंहाय नमः नाभिं पूजयामि । ॐ दामोदराय नमः हृदयं पूजयामि । ॐ जनार्दनाय नमः कण्ठं पूजयामि । ॐ श्रीधराय नमः बाहू पूजयामि । ॐ वाचस्पतये नम मुखं पूजयामि । ॐ जगन्नाथाय नमः ललाटं पूजयामि । ॐ सर्वात्मने नम शिरः पूजयामि । ॐ सत्यनारायणाय नमः सर्वाङ्गं पूजयामि ।

# तुलसीपत्राणि

तुलसी रत्नरूपां च हेमरूपां च मञ्जरीम् ।
भवमोक्षप्रदां नित्यमर्पयामि हरिप्रियाम् ॥

तुलसीपत्रं समर्पयामि र० स० श्री स० नमः ॥

## धूपम्

ॐ ब्राह्मणोस्य मुखमासीद् वाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्य पद्भ्या ७ शूद्रोऽअजायत्त।

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्॥

धूपमाघ्रापयामि र० श्रीस०।

## दीपम्

ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्य्योऽअजायत। श्रोत्रा-द्वायुश्च प्राणश्च मुखादग्निरजायत॥

घृतवर्ति-समायुक्तं वह्निना योजितं मया॥
दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम्॥

दीपं दर्शयामि रमासहिताय श्रीसत्यनारायणाय नमः॥

## नैवेद्यम्

ॐ नाभ्याऽआसीदन्तरिक्ष ६ शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूर्मिदिशः श्रोत्रात्तथालोकाँऽअकल्पयन्॥

नैवेद्यं गृह्यतां देव भक्तिं मे ह्यचलां कुरु।
ईप्सितं मे वरं देहि परत्रं च परां गतिम्॥

नैवेद्यं समर्पयामि श्रीरमासहिताय श्रीसत्यनारायणाय नमः॥

## फलं नैवेद्यम्

रसयुक्तानि स्वादूनि यथाकालोद्भवानि च ।
मयानीतानि देवेश फलानि प्रतिगृह्यताम् ।।

फलादि नैवेद्यं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।।

## अपूपम्

ॐ त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पितम् ।
गृहाण सुमुखोभूत्वा प्रसीद परमेश्वर ।।
रम्भाफलं घृतं क्षीरं गोधूमस्य च चूर्णकम् ।।
जातीपत्रलवङ्गैलाशर्करागुडमिश्रितम् ।।
सपादं सर्वभक्ष्याणि चैकीकृत्य निवेदितम् ।
मया श्रद्धावता देव गृहाण जगदीश्वर ।।

अपूपं समर्पयामि श्रीरमासहिताय श्रीसत्यनारायणाय नमः ।।

## आचमनीयम्

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत । वसन्तोस्या-
सीदाज्यङ्ग्रीष्म इध्मः शरद्धविः ।।

कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् ।
आचम्यतां जगन्नाथ मयादत्तं हि भक्तितः ।।

आचमनीयं समर्पयामि श्रीरमासहिताय श्रीसत्यनारायणाय नमः ।

## चन्दनादिकरोद्वर्तनम्

ॐ श्रीखण्डं कुङ्कुमं चैव कर्पूरागरुमिश्रितम् ।
करोद्वर्तनकं देव गृहाण परमेश्वर ।।

करोद्वर्तनकं समर्पयामि रमासहिताय श्रीसत्यनारायणाय नमः ।

## फलम्

ॐ इदं फलं मयादेव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेज्जन्मनि जन्मनि ।।

नारिकेलादिफलं समर्पयामि श्रीरमासहिताय सत्यनारायणाय नमः ।

## ताम्बूलम्

ॐ पूगीफलं महद्दिव्यं नागवल्लीदलैर्युतम् ।
एलाचूर्णादिसहितं ताम्बूलं प्रतिगृह्यताम् ।

ताम्बूलं समर्पयामि श्रीर० श्रीसत्य० नमः ।

## दक्षिणा

ॐ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ।।

दक्षिणां समर्पयामि रमासहिताय श्रीस० नमः ।

## चामरम्

ॐ शशाङ्ककरसंकाशं हिमडिण्डिरपाण्डुरम् ।
प्रोत्सारयासु दुरितं चामरामरवल्लभ ।।

चामरं दोलयामि रमास० श्रीसत्य० ।

## व्यजनम्

ॐ शिखिपुङ्खसमायुक्तं शैत्यमानन्ददायकम् ।
व्यजनं दोलयामित्वामतः शान्तिं प्रयच्छ मे ।।

व्यजनं दोलयामि श्रीरमासहिताय स० नमः ।

# आदर्शम्

ॐ दर्शनेन त्वमादर्श नूनं मङ्गलदायकः ।
शौर्य सौभाग्यसत्कीर्तिनिर्मलज्ञानदो भव ॥

आदर्शं दर्शयामि श्रीरमास० सत्यनारायणाय नमः ।

ततो यथाशक्ति जपं कुर्यात् ।

# नीराजनम्

ॐ पञ्चवर्तिसमायुक्तं घृतेन ज्वलितं मया ।
आरार्तिकप्रदानेन सन्तुष्टो भव सर्वदा ॥
चन्द्रादित्यौ च धरणीविद्युदनिस्तथैव च ।
त्वमेव सर्वज्योतींषि तेन नीराजयाम्यहम् ॥

नीराजनं सम०रमा० श्रीसत्य० ।

# कर्पूरदीपम्

सूर्येन्दुतारकावन्हिस्तेजः पुञ्जविराजितम् ।
कर्पूरदीपं देवेश गृहाण पुरुषोत्तम ॥

ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा । अग्निर्वर्चोज्योतिर्वर्चः स्वाहा सूर्यो वर्चो ज्योतिर्वर्चः स्वाहा ॥ ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहा ॥

# (ङ) पुष्पाञ्जलिः

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् । तेह नाकम्महिमानः सचन्त यत्र पूर्वे साध्या सन्ति देवाः ॥

ॐ नमो भगवते तुभ्यं सत्यनारायणाय ते ।
नमस्ते विश्वरूपाय शङ्खचक्रगदा भृते ।।
पद्मनाभाय देवाय हृषीकपतये नमः ।
नमस्तेऽनन्तरूपाय त्रिगुणात्मविभाविने ।।
लक्ष्मीकान्ताय देवाय जगदानन्दकारिणे ।
सहस्रशिरसे तुभ्यं वाग्विभूतिकृते नमः ।।

## प्रदक्षिणा

ॐ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः । देवा यद्यज्ञन्तन्वानाऽअबध्नन्पुरुष पशुम् ।।

यानि कानि च पापानि ब्रह्महत्या समानि च ।
तानि तानि प्रणश्यन्तु प्रदक्षिणपदे पदे ।।

## नमस्कार

सत्यनारायणं देवं वन्देऽहं कामदं विभुम् ।
लीलया विततं विश्वं येन तस्मै नमो नमः ।।
प्रणमामि सदा सत्यं सत्यनारायणं गुरुम् ।

## बद्धाञ्जलिः पठेत्

अमोघं पुण्डरीकाक्षं नृसिंह दैत्यसूदनम् ।
हृषीकेशं जगन्नाथं वागीशं वरदायकम् ।।
योगेश्वरं गुणातीतं गोविन्दं गरुडध्वजम् ।
जनार्दनं वृजानन्दं श्रीवल्लभमधीश्वरम् ।।
सत्यनारायणं देवं वन्देऽहं कामदं विभुम् ।
लीलया रचितं विश्वं येन तस्मै नमो नमः ।।

प्रणमामि सदा सत्यं सत्यनारायणं परम् ।
दुर्गमे विषमे घोरे शत्रुभिः परिपीडिते ॥
विविधापत्सु घोराषु दुःखेष्वपि च यद्भयम् ।
विनाशय सदादेव तत्सर्वमुपसर्गकम् ॥
त्वन्मायामोहिताः सर्वे ब्रह्माद्यास्त्रिदिवौकसः ।
न जानन्ति गुणं रूपं तवाश्चर्यमिदं प्रभो ।
मूढोऽहं त्वां कथं जाने मोहितस्तव मायया ।
प्रसीद पूजितो भक्त्या यथाविभवबिस्तरैः ॥
पुत्रं वित्तं च मच्चित्तं पाहि मां शरणागतम् ।
शरणं तं प्रपद्येऽहं सर्वकामार्थसिद्धये ॥
प्रणमामि सदा सत्यं देवं नारायणं गुरुम् ।

## विशेषार्घ्यं दद्यात्

ॐ जातो दैत्यवधार्थाय देवानां पालनाय च ।
तस्मै देवाय सत्याय सगुणाय महात्मने ॥
व्यक्ताव्यक्तस्वरूपाय हृषीकपतये नमः ॥
गृहाणार्घ्यं मया दत्तं रमया सहितः प्रभो ॥

## क्षमापनम्

ॐ त्राहि मां सर्वग श्रीश हरे संसारसागरात् ।
पुष्कराक्ष निमग्नोऽहं मायाविज्ञानमत्सरात् ॥
त्राहि मां देवदेवेश त्वत्तो नास्तीह रक्षिता ॥
इत्यर्घ्यं निवेद्य

## शङ्खजलं निवेदयेत्

ॐ यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलम् ।

निवेदितं च नैवेद्यं गृहाण चानुकम्पया ॥
मन्त्रहीनं क्रियाहीनं विधिहीनं सुरेश्वर ।
यत्पूजितं मयादेव परिपूर्णं तदस्तु मे ॥
साधु वासाधु वा कर्म यद्यदाचरितं मया ।
तत्सर्वं क्षम्यतां देव गृहाण परमेश्वर ॥

इत्यर्घ्यं पराङ्मुखं कृत्वा– ॐ अर्घ्यपात्राय नमः । ॐ शङ्खपात्राय नमः । इति पूजनम् ।

ततो ब्राह्मणद्वारा कथां शृणुयात् । कथा श्रवणानन्तरं पूर्णपात्रं कुर्यात्– (फलयज्ञोपवीतवस्त्रादिद्रव्यसमेतं तण्डुलपूर्णपात्रं हस्तेनादाय सङ्कल्पं कुर्यात्)

अद्येत्यादि देशकालौ समुच्चार्य . . . .मम कृतैतत् दीपकलशगणेशपूजनपूर्वकं साङ्गसपरिवाररमासहितश्रीसत्यनारायणपूजनकर्मणः परिपूरणार्थमिदं पूर्णपात्रं प्रजापतिदैवतं गोत्राय........ शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ।

## ततो दक्षिणासङ्कल्पः

हरिः ॐ तत्सदित्यादि देशकालौ संस्मृत्य........मम श्रुतिस्मृतिपुराणोक्त फलावाप्तिपूर्वकमनोवाञ्छासिद्ध्यर्थं सत्यनारायणव्रताङ्गत्वेन कृतस्य दीपकलश-गणेशगणपत्यादिवनस्पत्यन्तदेवतापूजनपूर्वकसाङ्गसपरिवाररमासहितश्रीसत्यनारा-यणपूजनकर्मणः प्रतिष्ठासाङ्गतासिद्ध्यर्थमिमां दक्षिणां रौप्यं चन्द्रदैवतं....... गोत्राय . . . . . . . नाम शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ।

ततो देवान् विसर्जयेत् ।

(विसर्जन)

ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् ।
इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥
गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर ।
यत्र ब्रह्मादयो देवास्तत्र गच्छ सुरेश्वर ॥

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि त्वं गतिः परमेश्वर ।

# कर्मेश्वरार्पणम्

ॐ कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतः स्वभावात् ।
करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत् ॥

ततः प्रार्थयेत्–

ॐ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां स मे विष्णुः प्रसीदतु ॥
ॐ अच्युताय नमः ३ । कर्मेश्वरार्पणमस्तु ॥

# ततोऽभिषेकं कुर्यात्

(अभिषेक)

ॐ द्यौः शान्ति ० । तच्चक्षुर्देवहितम् ० । ॐ स्वस्तिनऽइन्द्रो ० । इत्यादि मन्त्रैरभिषेकं कुर्यात् ।

# प्रसादवितरणम्

(प्रसाद वितरण)

## यजमान अपूपपुष्पादि हस्तेनादाय मन्त्रं पठेत्

बलिर्विभीषणो भीष्मःप्रह्लादो नारदो ध्रुवः ।
कपिलश्चान्तरिक्षश्च वसुर्वायुसुतस्तथा । ।
विश्वक्सेनोद्धवाक्रूरसनकाद्या महर्षयः ।
वासुदेवप्रसादोऽयं सर्वे गृह्णन्तु वैष्णवाः । ।

इति मन्त्रोच्चारणपूर्वकं विष्णुभक्तेभ्यः प्रसादादिकं समर्पयेत् ।

# ततो यजमानाय प्रसादवितरणम्

(यजमानलाई प्रसाद वितरण)

(आशिषमन्त्रपठनपूर्वकं प्रसादवितरणम्)

ॐ श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात्पवमानं महीयते ।
धनं धान्यं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥

॥ इति ॥

# सत्यनारायणस्य पूजार्थमावश्यकान्युपकरणानि

(आवश्यक उपकरणहरू)

गन्धम् । सिन्दूरम् । अभिरकम् । अक्षताः। यवाः । तिलाः । पुष्पाणि । दूर्वाङ्कुराणि । दुग्धम् । दधि । घृतम् । मधु । शर्करा । पूगीफलम् । यज्ञोपवीतम् । वस्त्रम् । पीताम्बरम् । सर्षपः । सर्वौषधीः । आम्र–अश्वत्थ–आदि पल्लवाः । माल्यम् । तुलसी दलम् । धूपः । दीपः । नैवेद्यम् । अपूपनैवेद्यम् । फलानि । ताम्बूलम् । कर्पूरम् । कुशाः । कर्मपात्रम् । अर्घ्यपात्रम् । त्रिपादिका । सत्यनारायणस्य प्रतिमा । आसनम् । प्रतिमा आधारपात्रम् । पञ्चरत्नम् । सौभाग्यद्रव्याणि ।

अभ्यासः

१– दश दिक्पालानां नामानि लेख्यानि ।
२– आसनमन्त्रः कः ? सुस्पष्टं लिखत ।
३– सत्यनारायणस्य प्रधाननैवेद्यं किम् ? तत्र प्रक्षेप्यवस्तूनि लेख्यानि ?
४– शशाङ्ककरसङ्काशं, त्राहि मां सर्वग, इमौ मन्त्रौ कुत्र विनियुज्येते ?
५– आशीर्वादमन्त्रं लिखत ।

## शिक्षक निर्देशन

कर्मकाण्ड एक सैद्धान्तिक ज्ञान मात्र नभएर व्यावहारिक रूपमा प्रयोग समेत गर्नुपर्ने विधि हो। त्यसैले यस विषयको शिक्षा दिंदा शिक्षकले सैद्धान्तिक र प्रयोगात्मक दुवैलाई सँगसँगै सञ्चालन गर्नुपर्छ। तर याद राख्नुपर्ने कुरा के छ भने जुन विधि कक्षाकोठामा प्रयोग गरेर देखाउन सम्भव हुँदैन वा उपयुक्त ठहर्दैन त्यस्ता कुरा अन्यत्र अनुकूल ठाउँमा लगी प्रयोग गराउनुपर्छ।

सन्ध्यावन्दन जस्तो विधिलाई प्रयोगात्मकरूपमा सिकाउँदा बिहान वा साँझको बेला निकटवर्ती नद, नदी, तलाउ अथवा देवमन्दिरमा लगी सिकाउनु राम्रो पर्छ। यस्ता विधिलाई प्रयोगात्मक रूपमा सिकाउन पहिले आफूले गरी देखाउने र पछि विद्यार्थीलाई गर्न लगाई नभएको वा नमिलेको कुरामा सचेत तुल्याई सुधार्न लगाउनुपर्छ।

जुनसुकै विषयको प्रयोगात्मक ज्ञान गराउँदा त्यसको लायक उपकरण पनि हुनु आवश्यक [illegible]। यस्ता उपकरण मिलेसम्म विद्यालय र नमिलेमा अन्यत्रबाट भए पनि जुटाई प्रयोग गराउनुपर्छ।

उदाहरणका लागि सामान्य सन्ध्याविधि गर्दा आसनी, पञ्चपात्र र आचमनी जोर, थाली, अर्घ, भस्म, कुश, जल, चन्दन, जौ, तिल फूल र उपयुक्त बेला तथा स्थान आवश्यक पर्छन्।

यसै गरी सङ्कल्पको ज्ञान गराउँदा यज्ञ, पूजा, दान वा संस्कार के गर्न लागिएको हो अनि नित्य, नैमित्तिक वा काम्य कस्तो कर्म गरिने हो त्यो कुरा बुझी त्यसको मिलाएर वचन प्रयोग गर्न सिकाउनुपर्छ। एउटै कर्ममा धेरै सङ्कल्प वाक्य प्रयोग गर्नुपर्दा प्रधान सङ्कल्पमा पूरा वाक्य पढ्ने र अरूमा चाहिं 'पूर्वोक्त सङ्कल्प सिद्धिरस्तु' भन्ने अगाडिको अंश मात्र प्रयोग गर्ने कुराको जानकारी गराइदिनुपर्छ। अरू विधि सम्पन्न गराउँदा पनि यस्ता व्यावहारिक र सैद्धान्तिक कुरामा विद्यार्थीको ध्यान आकृष्ट तुल्याइदिनुपर्छ। आफूलाई याद नभएको कुरा विज्ञ कर्मकाण्डीसित जानकारी लिई सिकाइदिन पनि शिक्षकले पछि पर्नु हुँदैन।

## कक्षागत रूपमा कक्षा ८ का विद्यार्थीले गाउने राष्ट्रिय गीत

तराई हेर कति राम्रो हरियो वन हुनाले
पहाड हेर झनै राम्रो गुराँस फुल्नाले
म त हेर त्यसै राम्रो यसै राम्रो
त्यसै राम्रो नेपाली हुनाले
सगरमाथा मेरै आफ्नो शिर भइदिनाले ।।

अरूको भरमा बाँच्नु पर्छ हातै नहुनेले
एक दिन भोकै मर्नु पर्छ पौरख नहुनेले
म त मेरै पौरख खान्छु
म त हातका नङ्ग्रा खियाउँछु, नेपाली हुनाले
सारा नेपालीको लक्ष्य एउटै भइदिनाले ।।

अरूको सारमा हिंड्नु पर्छ आँखै नहुनेले
अन्यायलाई सहनु पर्छ निर्धो भइदिनाले
म त अन्यायसित लड्छु,
ठूलो सानो एउटै देख्छु, नेपाली हुनाले
राजा-रानी मेरै दुइटा आँखा भइदिनाले ।।



शिक्षा सामग्री केन्द्र लिमिटेड २०३४